# जाहिरात.

अमारा तरफथी प्रकट थयेलां पुस्तको.

| | |
|---|---|
| कीर्तन रत्नाकर (सेवा विधि तथा कीर्तन विधि साथे) रु | ३ ०-० |
| श्रीगोवर्धननाथजीनुं प्राकटय. | ०-४-० |
| वल्लभाख्यान अने मूलपुरुष. | ०-१-० |
| गोपीगीत गुर्जरभाषान्तर तथा यमुनाजीनां ४० पद वगेरे. | ०-१-६ |
| गोपीगीत समश्लोकी गुर्जरटीका वगेरे. | ०-१-६ |
| निर्भयरामभट्टकृत आशौचनिर्णय गुर्जरटीका साथे | ०-३ ० |
| श्री गोकुलनाथजीनां २४ वचनामृत व्रजभाषा (मोटा टाईप) | ० ३ ० |
| नंददासजीकृत रास पंचाध्याई भ्रमरगीत वगेरे. | ० १४-० |

नडीआद, गुजरात. } त्रीभोवनदास पीताम्बरदास शाह.

उपरनां पुस्तको नीचे लखेले ठेकाणे पण मळशे.

अमदावाद, } ललुभाई छगनलाल देसाई,
चंगपोळ – खत्रीपोळ.

मुंबई. } भूलेश्वर—की…
कालबादेवीरोड…

} श्री पुष्टि…

Library IIAS, Shimla
S 181.484 4 V 835 S
00009272

॥ श्रीकृष्णाय नमः ॥

श्रीमद्विट्ठलेश्वरविरचितं

# श्रीमद्वल्लभाष्टकम् ॥

तच्च

श्रीगोकुलेशादिप्रकटितविवरणचतुष्टयसमेतं

श्रीमद्वल्लभाधीश्वरचरणकमलानुरागिभ्यो वितरणार्थं

नटपुरस्थपीताम्बरदासतनयत्रिभुवनदासेन

कृष्णमुद्रालये मुद्रयित्वा प्रकटितम् ॥

S
181.484 4
V 835 S

S
181.4844
V835S

72

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 9272
30.3.66

29-12-87

S
181.4844
V835S

Library IIAS, Shimla
S 181.484 4 V 835 S
00009272

श्रीमद्वल्लभाष्टकस्य

# शोधपत्रम्

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| १ | ६ | सन्मनुष्थाकृति- | सन्मनुष्याकृति— |
| २ | ३ | -तिकथनात | -तिकथनात् |
| ,, | ७ | -तदाहला- | -तद्राह्ला- |
| ३ | १ | -नावश्यंकत्यात् | -नावश्यकत्वात् |
| ,, | १४ | लाके | लोके |
| ४ | १५ | भवद्देव | भवेदेव |
| ५ | १८ | अतपवापिशब्द: | अत पवापिशब्दः |
| ६ | १ | -ज्ञानाभाबं | -ज्ञानाभावं |
| ,, | १० | तज्ज्ञापनेनव | तज्ज्ञापनेनैव |
| ,, | ११ | -मीष्ट | -मीष्टे |
| ७ | १० | फलत्वनाहुः | फलत्वेनाहुः |
| ,, | १२ | संभूतिर्मायेतिसंभूति - | सम्भूतिर्मायेति सम्भूति- |
| ,, | १६ | नित्यदुःखाइतिपाठे | नित्यदुःखा इतिपाठे |
| ८ | १ | -वर्त्मप्राकट्यं | -वर्त्म- |
| ,, | २ | यत् कृतं | प्राकट्यं यत् कृतं |
| ,, | ५ | पूर्वमक- | पूर्वमेक- |
| ,, | १३ | समपित- | समर्पित- |
| ९ | ५ | काापि | कापि |
| ,, | ८ | साचितः | सूचितः |
| ,, | १० | -वृष्टि- | -वृष्टी- |
| ,, | १३ | -यस्मानंददं | -यस्मादानन्ददं |

| | | | |
|---|---|---|---|
| १० | ६ | -नदंदं | -नन्ददं |
| ,, | २० | अविभु | अधिभु |
| ,, | २१ | तन | तेन |
| ,, | ,, | -कारणयारेक- | -कारणयोरेक- |
| ११ | १२ | -सव- | -सर्व- |
| १२ | ६ | तद्रपं | तद्रूपं |
| ,, | १६ | ाचार्यसेवकः | आचार्यसेवकः |
| ,, | १८ | -त्येकं | त्येकं, |
| ,, | २० | दंत्त | दत्तं |
| १३ | ९ | तस्यांनद- | तस्यानन्द- |
| ,, | २० | इनि | इति |
| १४ | ४ | तद्दष्टकीय- | तद्दष्टकीय- |
| १६ | १५ | पचादित्वाल्लयुः | नन्द्यादित्वाल्ल्युः[1] |
| १७ | १ | तेनति | तेनेति |
| ,, | १३ | आविर्भया- | आविर्भूया- |
| ,, | १७ | भगवनीत्यथः | भगवतीत्यर्थः |
| ,, | २१ | मीमांसादनीति | मीमांसादीनीति |
| १८ | ७ | लक्षक | लक्षकं |
| ,, | ,, | साष्टि | साष्टिं |
| ,, | ८ | श्रुतिविराध | श्रुतिविरोधं |
| ,, | ११ | -श्रुनीनां | -श्रुतीनां |
| ,, | १९ | -सहस्रश | -सहस्रश" |
| २० | ७ | दिदं | तदिदं |
| ,, | १० | घोशाघाश- | घोषाघोश- |
| ,, | १३ | -यास्काक्त- | -यास्कोक्त- |

---

१ अत्र करणाधिकरणयोश्चेति ल्युडिति तु कश्चित् ।

| | | | |
|---|---|---|---|
| २१ | १४ | इतिश्रुत्यन्तर दृष्टान्त- | इतिश्रुत्यन्तरदृष्टान्त |
| ,, | १५ | वाक्पतित्व | वाक्पतित्वं |
| २२ | १ | -प्रतिज्ञ | -प्रतिज्ञां |
| ,, | ७ | त्याकांक्षायां | इत्याकाङ्क्षायां |
| २२ | १० | सवोपि | सर्वोपि |
| ,, | १४ | संकर्षणाटिवत् | सङ्कर्षणादिवत् |
| २३ | ३ | भवतति- | भवतीति- |
| २४ | ५ | कवल- | केवल- |
| ,, | ५ | व्यतरके | व्यतिरेके |
| ,, | ९ | सिद्ध - | सिद्धे- |
| ,, | १७ | तद्ध्यापा | तद्ध्यापो |
| २५ | १९ | विभायानुमाव- | विभावानुभाव- |
| २६ | २० | -वोधक | -बोधकं |
| २७ | ६ | विलक्षणाग्नित्व | विलक्षणाग्नित्वं |
| ,, | ८ | -तापादय | -तापोदय |
| ,, | २० | -द्वाभ्यांसोपपत्तिक- | -द्वाभ्यां सोपपत्तिक- |
| २८ | १० | पु र्णज्ञानिभि- | पूर्णज्ञानिभि- |
| ,, | ११ | कवानां | कर्वीनां |
| ,, | १४ | भातेर्डवतौ | "भातेर्डवतु"रिति- |
| ३० | १ | श्रीगोपीजनवल्लभायनमः | श्रीगोपीजनवल्लभाय नमः |
| ,, | ८ | -यतीात | -यतीति |
| ३१ | ४ | -आरभ्य | -आरभ्य |
| ,, | १७ | -न्नात्यन्त | -न्नात्यन्तं |
| ३२ | १० | केवलंसुखसंचाररहितंयथा | केवलं सुखसञ्चाररहितं यथा |
| ,, | १३ | भक्तिमागः | भक्तिमार्गः |

| | | | |
|---|---|---|---|
| ३३ | ३ | शीतलाये | शीतला ये |
| ,, | ,, | वचः पुञ्जाः | वचःपुञ्जाः |
| ,, | ६ | प्रकटयसिं | प्रकटयसि |
| ३५ | ३ | श्रियोपिमण्डनरूप | श्रियोपि मण्डनरूप |
| ,, | ४ | त्वद्भनने- | त्वद्भजने- |
| ३६ | २ | पुष्ठि- | पुष्टि- |
| ,, | २० | -शङ्क्याहु- | -शङ्क्याहु- |
| ३७ | १७ | प्राप्नुयु 'योन्य- | प्राप्नुयु'र्योन्य- |
| ३८ | १२ | व्यज्यँते | व्यज्यते |
| ,, | १८ | "नामसम्बन्धतोभवेदि"- | "नामसम्बन्धतो भवेदि"- |
| ३९ | ७ | अन्व- | अन्ध- |
| ,, | १० | -भावायमेव | -भावोयमेव |
| ,, | २१ | हास्यसहितेत्वत्सम्बन्धात् | हास्यसहिते त्वत्सम्बन्धात् |
| ४३ | १७ | -द्धियोगाधि" मित्यादि | द्धियोगाधि"मित्यादि |
| ,, | ,, | वदिष्यती" त्यादिषु | वदिष्यती"त्यादिषु |
| ,, | १९ | "नमोनमस्तेस्त्वि"- | "नमो नमस्तेस्त्वि-" |
| ,, | २० | स्फूतिरेव | स्फूर्तिरेव |
| ४४ | ३ | मत्प्रभो | मत्प्रभोः |
| ,, | ६ | यत्: | यतः |

शुद्धिपत्रे दर्शिता अशुद्धीस्संशोध्यैव वाच्यमिति विज्ञप्तिः ॥
टीकान्तरमुद्रणानन्तरमेवानुवादप्रकाशोपि भविष्यत्येवेति च प्रतिज्ञप्तिः

श्रीमद्विट्ठलेश्वरविरचितं

# ॥ श्रीमद्वल्लभाष्टकम् ॥

श्रीमद्वृन्दावनेन्दुप्रकटितरसिकानंदसंदोहरूप-
स्फूर्जद्रासादिलीलामृतजलधिभराक्रांतसर्वोऽपि शश्वत्।
तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासीद्
भूमौ यः सन्मनुष्याकृतिरतिकरुणस्तं प्रपद्ये हुताशम्॥१॥

## ॥ श्रीवल्लभाविरचितं श्रीवल्लभाष्टकविवरणम् ॥

यत्पादरजसागत्य मनो मे चंचलीकृतं ।
तत्कृताचार्यपद्यानां विवृतौ यत् प्रवर्तते ॥ १ ॥
विवृतेः सफलत्वाय नत्वा पितृपदाम्बुजं ।
विवृतिः कर्तुमारब्धा [1]ह्यतिविश्वासतो मया ॥ २ ॥

ननु श्रीवल्लभाचार्याणां स्वरूपस्य तद्धर्माणां तदीयानां च सर्वेषामेवालौकिकत्व-भावात्[2] तादृशस्य लोके जन्माद्यसंभवाज्जन्मादीनां प्रतीयमानत्वात्तदीयानां तत्र हेत्वज्ञानाद्भवति संदेह इति पितृचरणैस्तदीयानामितरसाधारण्येन जन्माभावार्थं प्रादुर्भावे हेतुज्ञापनार्थं प्रादुर्भावस्य चासाधारणकार्यकर्तृत्वज्ञापनार्थं तत्स्वरूप-प्रादुर्भावं तत्कृतासाधारणधर्मांश्च ज्ञापयितुं पितृचरणाः सर्वसंदेहनिवृत्त्यर्थं

---

१. 'नातिविश्वासतो मये'ति पाठोऽपि समीचीनः ।
२. भावादिति भावनादिति चापि पाठौ ।

तत्स्वरूपादिकमाहुः श्रीमद्वृंदावनेन्दुप्रकटितेति, वृन्दावनस्य श्रीमत्त्वोक्त्या इतरवनवैलक्षण्यं निरूपितं, एतदितरस्य श्रीमत्त्वाभावात्, यदि शोभापरत्वेन कदाचिच्छ्रीमत्त्वमुच्यते तथाप्यत्र "श्रयत इंदिरा शश्वदत्र ही"तिकथनात साक्षाच्छ्रीनिवासान्नैतत्समत्वमितरेषु, एतस्यालौकिकत्वेनापि महद्वैलक्षण्यं, अस्यालौकिकत्वे धर्मान्तरमप्याहुः, यथा लौकिकवनस्याधिपतिर्लौकिकश्चंद्रः "सोम औषधीनामधिपति"रितिश्रुतेः आह्लादकः स्वामृतस्यंदेन पोषकश्च [1]तथात्र साक्षाद्रसात्मकपुरुषोत्तमस्येन्दुत्वेनैतद्वनस्यैतदधिपतित्वमेतदाह्लादकत्वं, इन्दुपदादस्य वनस्य वेणुनादद्वारा सर्वत्र स्वस्वरूपामृतप्रवेशनेनैतदार्द्रीकरणत्वं, 'उंदी क्लेदने'इतिधात्वर्थस्य तथैव सिद्धेः, उंदेरिच्चेति उः, आदेश्च इकारः, इतोपि महद्वैलक्षण्यं, तेनेन्दुना प्रकटितो यो रसिकेष्वंतरंगभक्तेषु आनंदसमूहस्तद्रूपस्तत्स्वरूपः, स चासौ स्फूर्जद्रासादिलीलामृतजलधिभराक्रांतसर्वश्च, स्फूर्जंतः स्फुरद्रूपा ये रासादिलीलारूपा अमृतजलधयः अमृतसमुद्राः, लीलानाममृतत्वनिरूपणेन माधुर्यं मरणादिसर्वदोषनिवर्तकत्वमेतल्लीलाभिनिविष्टपेयत्वं [2]नान्येषां, तथात्रापि जलधित्वेनागाधत्वं तरंगवत्त्वं च, तेन यथा जलधावुत्तरोत्तरतरंगाधिक्यं तथैवैतल्लीलासमुद्राणामुत्तरोत्तररसभावाधिक्यं, तादृशानां जलधीनां भरः आधिक्यं तेन आक्रांतं सर्वं देहेन्द्रियप्राणान्तःकरणादि यस्य तादृशः, आक्रांतेः कादाचित्कत्वनिराकरणार्थं शश्वदित्युक्तं, तेन सदैतद्रसपूर्णत्वं निरूपितं, तेनाचार्याणां बाह्याभ्यंतरभेदेन धर्मा निरूपिताः, अतःपरं तादृशस्य लोके इतरसाधारण्येन जन्मादिकमसंभावितमिति लौकिकप्रकारेण जन्माभाववत्त्वं प्राकट्ये च हेतुमाहुः, यद्यपि

---

१ तथापदं क्वचन नास्ति । २ 'नान्येषा'मिति नास्ति यत्र, तत्र चेतिपाठः ।

प्राकट्यं न संभवति तथापि प्रादुर्भावस्य भगवदिच्छाधीनत्वेनावश्यकत्वात् प्राकट्यहेतुभूतां भगवदाज्ञामाहुः **तस्यैवेति**, **तस्यैव** भगवत एवाज्ञया **प्रादुरासीत्**, आज्ञायामावश्यकत्वमाहुः **आत्मानुभावप्रकटनहृदयस्येति आत्मनः** स्वस्य योयमनुभावः असाधारणलीलाकरणरूपस्तस्य **प्रकटने हृदयमंतः**-करणं यस्य तादृशस्याज्ञया, ननु कथमाचार्याणामेवेयमाज्ञा? तत्र हेतुः, आज्ञाया-मात्मानुभावप्रकटनहेतुत्वेनात्मानुभवस्य लीलात्मकत्वेन तद्भावानामनुभवैकवेद्य-त्वेन लीलांतःपात्यतिरिक्तस्यावेद्यत्वेन तदंतःपातिन एव वेद्यत्वादेतेषामेवाज्ञा, तेन प्रादुर्भावस्यावश्यकत्वं निरूपितं, तेन **प्रादुरासी**दितिपदेन तत्स्वरूपा-ज्ञानवतामेव लौकिकसाधारणधर्मादिस्फूर्तिः, वस्तुतस्तु प्रादुर्भाव एव स्वरूप-स्यालौकिकत्वात्, प्रादुरासीदित्युक्त्वानुपदमेव **भूमौ सन्मनुष्याकृति**रिति-कथनात्तत्प्रकारिकैव प्रादुर्भावाज्ञेति ज्ञायते, सर्वप्रकारोत्कृष्टतदाकृतित्वाभावे भक्तानां संतोषेण प्रवृत्तिर्न स्यात्, आज्ञयापि [1]प्रादुर्भावे हेतुः **अतिकरुण** इति, यच्छब्दस्य सामान्यवाचकत्वात्प्रादुर्भूतस्य स्वरूपानिर्देशात्तज्ज्ञानव्यति-रेकेण शरणागतेरसंभवात्तत्स्वरूपमाहुः **हुताशमिति**, हुताशपदस्य लोके साधारणाग्निवाचकत्वेनात्र च लौकिकाग्नेरसंभवाद्भगवन्मुखारविंदाधिष्ठातृरूपा-लौकिकाधिदैविकानंदमयोग्निरत्र ज्ञाप्यते, लौकिकाग्नेः पूर्वोक्तधर्माणामभावा-द्भगवदाज्ञापनस्याप्यभावात्प्रादुर्भूतस्य हुताशत्वनिरूपणात्पूर्वोक्तालौकिक-धर्मवत्त्वं तस्य ज्ञाप्यत इतिभावः ॥ १ ॥

---

१ 'प्रादुर्भावहेतुमाहु'रित्यपिपाठः ।

**नाविर्भूयाद्भवांश्चेदधिधरणितलं भूतनाथोदितास-**
**न्मार्गध्वांतांधतुल्या निगमपथगतौ देवसर्गेऽपि जाताः ।**
**घोषाधीशं तदेमे कथमपि मनुजाः प्राप्नुयुर्नैव दैवी**
**सृष्टिर्व्यर्था च भूयान्निजफलरहिता देव वैश्वानरैषा ॥२॥**

एवमाचार्याणां स्वरूपं प्रादुर्भावे निमित्तं प्रादुर्भावप्रकारं चोक्त्वा तत्कर्तृकमसाधारणकार्यमाहुः **नाविर्भूयादिति, भवांश्चेन्नाविर्भूयात्तदा निजफलरहिता एषा सृष्टिर्व्यर्था स्यादिति** संबंधः, **भवांश्चेत्** भवान् यदि, **धरणितलमधिकृत्याविर्भूतो** न भवेत्तदाग्रे वक्ष्यमाणं कार्यद्वयं न भवेत्, यद्यपि सर्वदा भगवन्मुखारविंदे[1] स्वाधिकरणे [2]तत्प्रादुर्भावोस्त्येव तथापि तत्र स्थितस्य भगवदाज्ञप्तकार्यकरणासंभवादत्र प्रादुर्भूतस्यैव तत्कार्यकरणाद**धिधरणितल**मित्युक्तं, कार्यद्वयं च मर्यादापुष्टिभेदेन तन्मार्गीयफलप्राप्तिरूपं, ननु मर्यादामार्गस्य वेदमूलत्वाद्वेदे च तन्मार्गीयसाधनोपदेशात्कथं तत्साध्यफलस्य मुक्तेरभाव इति चेत्, सत्यं, यदि साधनफलयोस्तदुक्तप्रकारेण ज्ञानं स्यात्तदा फलं भवेदेव, तदुक्तप्रकारकज्ञानाभावात्फलाभावः, ननु कथं तत्प्रकारकज्ञानाभावः? इत्थं, तत्साधकानां वेदवाक्यानां स्वस्वमतानुसारेणार्थकल्पनात् फलस्यापि स्वस्वमतानुसारेणानेकविधत्वकल्पनान्नैकरूपत्वं मुक्तेः, मतभेदेन साधनमुक्त्योः प्रकारभेदे हेतुमाहुः **भूतनाथोदितेति, भूतनाथेन** महादेवेनोदिताः प्रकटीकृता ये **असन्मार्गा**

---

१ इदं क्वचन तिरोहितम् ।
२ 'तत्प्रादुर्भाव' इत्यपि पाठः ।

मोहकशास्त्राणि मायावादन्यायमीमांसादीनि, तत्तच्छास्त्रेषु स्वस्वमतानुसारेण साधनफलनिरूपणान्नैकविधत्वं साधनफलयोः, तद्यथा, वेदे च "ब्रह्मविदाप्नोति परं" "ब्रह्मणः सायुज्यं सलोकतामाप्नोति" इत्याद्यनेकश्रुतिभिर्जीवस्य ब्रह्मप्राप्तिलक्षणो [1]मुक्तिप्रकार उक्तः, गीतायामपि "विशते तदनंतर"मिति जीवस्य स्वस्मिन्प्रवेशस्यैव मुक्तित्वमुक्तं भगवता, मायावादादिभिस्तद्विरुद्धं कल्पितजीवस्य नाशो मुक्तिरित्युच्यते, तत्रात्मनाशस्यापुरुषार्थत्वान्मुक्तेश्च पुरुषार्थत्वात्तन्मतं वेदविरुद्धत्वादसद्रूपं, नैयायिकैस्तु षोडशपदार्थतत्त्वज्ञानस्य मुक्तिहेतुत्वमुच्यते, मुक्तेश्च सुखदुःखात्यंताभावरूपत्वं, वेदे च मुक्तेरानंदरूपत्वनिरूपणात्तन्मतमप्यसत्, मीमांसकैस्तु यागसाधनसाध्यस्वर्गलोकसुखस्यैव मुक्तित्वकथनात् श्रुतौ "यन्न दुःखेन संभिन्न"मिति ब्रह्मानन्दानुभवस्यैव स्वर्गपदवाच्यत्वात्स्वर्गलोके चैतल्लक्षणाभावान्न मुक्तित्वं, एतन्मतानुवर्तिनां वेदोक्तमुक्तिमार्गगतिप्रतिबंधात् ध्वान्तत्वं, यथा ध्वान्तं प्राप्यदेशगमनप्रतिबंधकं तथासच्छास्त्राणामपि मुक्तिमार्गाज्ञापकत्वाद् ध्वान्तत्वेन तन्मार्गानुवर्तिनोंधतुल्याः, आसुराणां गीतोक्तप्रवृत्तिनिवृत्त्यादिज्ञानप्रकाशात्यंताभावाद्वेदोक्तमुक्तिमार्गे स्वाभाविकांधत्वं, दैवानां तु मुक्तियोग्यत्वेन श्रुत्युक्तभक्तिमार्गज्ञानसंभवेप्यसच्छास्त्रध्वांतप्रवेशेनांधतुल्यत्वं नतु स्वाभाविकांधत्वमिति तुल्यपदप्रयोगः, यदा सत्संगेन ध्वान्तनाशस्तदा फलमपीतिभावः, अतएवापिशब्दः, कदाचित्तच्छास्त्रपरा आसुरा भविष्यंतीतिशंकाव्युदासायाहुर्दैवसर्गेपीति, एतच्छास्त्रपराणां दैवानामपि मुक्तिमार्गाज्ञानं ज्ञापितं, एवं मर्यादामार्गे साधनफल-

---

१ 'मोक्षप्रकार' इत्यपि पाठः ।

ज्ञानाभावं निरूप्य पुष्टिमार्गेपि तथात्वं निरूपयन्ति, तदा तस्मिन्समये तत्सर्गादिमे मनुजाः पुष्टिमार्गीयजीवा अपि स्वमार्गीयसाधनज्ञानाभावात्स्वमार्गीयसाक्षाद्भगवत्संबंधरूपं फलं न प्राप्नुयुः, तदा एषा पुष्टिमार्गीया सृष्टिर्व्यर्थैव भवेत् फलाभावात्, यथा मर्यादामार्गे मुक्तिः फलं तथा पुष्टिमार्गे साक्षात्पुरुषोत्तमस्वरूपसंबंधः फलं, तत्साधनं च भक्तिमार्गीयो भावः, पुष्टिभक्तिमार्गे साक्षात्पुरुषोत्तम एव सेव्य इति घोशाधीशपदं, "पुरुषोत्तमस्तु नंदगृह एवे"तिवाक्यात्, साक्षात्संबंधसाधकस्त्वमेवेति देव वैश्वानरेतिसंबोधनं, दिवुधातोः क्रीडार्थत्वाद्वैश्वानरत्वेन मुखाधिष्ठातृत्वात्फलसाधकत्वं, त्वत्प्राकट्यात्पूर्वं मार्गद्वयभेदस्य तन्मार्गीयसाधनफलभेदस्य चाज्ञातत्वात्प्राकट्यानंतरमेव तज्ज्ञापनेनैव ज्ञापितत्वात्सुष्ठूक्तं नाविर्भूयादिति ॥ २ ॥

**नह्यन्यो वागधीशाच्छ्रुतिगणवचसां भावमाज्ञातुमीष्टे**
**यस्मात् साध्वी स्वभावं प्रकटयति वधूरग्रतः पत्युरेव ।**
**तस्माच्छ्रीवल्लभाख्य त्वदुदितवचनादन्यथा रूपयंति**
**भ्रांता ये ते निसर्गत्रिदशरिपुतया केवलांधंतमोगाः[१] ॥३॥**

ननु सन्मार्गाणां श्रुतिप्रतिपाद्यत्वात्तद्व्याख्यातृणां तदर्थज्ञानात् कथमेतन्मार्गाज्ञानमितिचेत्, सत्यं, व्याख्यातृणां तत्तात्पर्यानवबोधान्न तज्ज्ञानं, अनवबोधे को हेतुरितिचेत्तत्राहुः नह्यन्य इति, " निःश्वसितमस्य वेदा " इतिवचनाच्छ्रुतीनां च भगवद्वाग्रूपत्वादलौकिकाग्नेश्च तदधिष्ठातृत्वादाचार्या-

१ केवलं नित्यदुःखा इत्यपि पाठः ।

णामलौकिकाग्निरूपत्वाच्छ्रुतीनां[१] तदेकपरत्वात् स्वतात्पर्यस्यात्रैव[२] ज्ञापनादन्येषामज्ञानमिति, एतदेवाभिप्रेत्योक्तं **वागधीशादन्यः श्रुतिगणवचसां भावं** तात्पर्यं **आ** समंतात्सर्वात्मना ज्ञातुं समर्थो न भवति, तत्र हेतुः **यस्मात् साध्वीत्यादि, साध्वी** सती "वेदैश्च सर्वैरहमेव वेद्य" इतिवाक्यात् श्रुतीनां भगवदेकपरत्वात्साध्वीत्वं, सा **पत्युरेवाग्रे** स्वहार्दं **प्रकटयति** न त्वन्यस्य, तस्मादुक्तार्थ एव श्रुत्यभिप्रायात्तत्तात्पर्यस्य नान्यगम्यत्वं, इदमेवाभिप्रेत्योक्तं **यस्मात्साध्वीति पत्युरेवे**त्यंतं, तदुक्तार्थे श्रुत्यभिप्रायं निरूप्य तत्रोपपत्तिं च निरूप्य तद्विपरीतव्याख्यातॄणां भ्रांतत्वं भ्रमहेतुमप्याहुः **निसर्गात् त्रिदशरिपुतये**ति, **निसर्गा**त्स्वभावत एव तेषामासुरत्वं यतः, उक्तार्थपराणां किं फलमित्याकांक्षायां तत्पराणामासुरत्वादासुरीं मुक्तिं फलत्वेनाहुः **केवलांधंतमोगा** इति, श्रुतिरप्याह "अंधंतमः प्रविशन्ति ये संभूतिमुपासते" इति, सम्यक् प्राग् भवंति जायंते आसुरा अनयेति संभूतिर्मायेतिसंभूतिपदस्य मायावाचकत्वा "न्मायेत्यसुरा" इत्यासुराणां मायारूपस्योपास्यत्वादुपासनायाश्चांधंतमःप्रवेशहेतुत्वात्तेषां तदेव फलं, **नित्यदुःखा**इतिपाठे यद्यपि तन्मुक्तौ दुःखाभावोप्यस्ति तथाप्यानंदाभावात् दुःखाभावस्याप्यपुरुषार्थत्वात् दुःखरूपत्वमेवेतिभावः ॥ ३ ॥

---

१ श्रुतेश्चेत्यपि पाठः । २ तन्नैवेत्यपि पाठः ।

**प्रादुर्भूतेन भूमौ व्रजपतिचरणांभोजसेवाख्यवर्त्मप्राकट्यं यत् कृतं ते तदुत निजकृते श्रीहुताशेति मन्ये।**
**यस्मादस्मिन् स्थितो यत्किमपि कथमपि क्वाप्युपाहर्तुमिच्छत्यद्धा तद्गोपिकेशः स्ववदनकमले चारुहासे करोति॥४॥**

तत्प्रादुर्भावस्य पूर्वमेकमसाधारणं कार्यं निरूप्य पुनरपि ततोप्यधिकं तस्य भगवतोप्यत्यंतप्रीतिजनकमसाधारणत्वमाहुः **प्रादुर्भूतेनेति**, प्रादुर्भूतेन त्वया **व्रजपतेश्चरणांभोजसेवाख्यवर्त्मप्राकट्यं भूमौ यत् कृतं तन्निजकृते** स्वसंतोषार्थमित्यर्थः, यद्यपि लोके पूजादिमार्गप्राकट्यं स्थितं तथापि भक्तिमार्गीयसेवामार्गप्राकट्यं यत् कृतं **तन्निजकृते** आत्मसंतोषार्थं, पूजादौ आत्मसंतोषहेतोरभावात्, तत्र हेतुः, सेवायां पुरुषोत्तम एव सेव्यः पूजायां विभूतिरूपः, सेवायां नियामिका भक्तिः पूजायां विधिः, पूजायां कालोपि नियामकः सेवायां न कालनियमो भक्तमनोरथाधीनत्वात्, पूजायां नैवेद्याद्युपचाराणां पूज्यसंतोषजनकत्वेनादृष्टजनकत्वं सेवायां तु समर्पितवस्तूनां साक्षादुपभोगेन[२] सर्वदुर्लभपुरुषार्थसाधकत्वमित्यादिसर्वप्रकारैर्वैलक्षण्यात्, पूजामार्गस्यासंतोषहेतुत्वाद्भक्तिमार्गीयसेवाप्रकटनं, सेव्यचरणयोरंभोजत्वोक्त्या सेवनेत्यंतसुखदत्वं ज्ञापितं, उतेति समुच्चये, तेन निजकृते इत्यत्र **निजाः** स्वीयास्तेषामपि कृते तत्प्रकारकसेवाकरणेन कृतार्थत्वाय, किंच **स्ववदनकमले करोती**तिकथनस्य वदनाधिष्ठातृत्वात्तद्भोजनेन तदधिष्ठातुरपि भोजनसिद्धिरिति **निजकृत** इत्युक्तं, श्रीहुताशेति-

---

१ यः **किमपीत्यपि भाति.**

२ साक्षादुपयोगेनेत्यपि पाठः।

संबोधनेन मार्गप्रकटनसामर्थ्यं द्योतितं, **मन्ये** इति स्वविश्वासो ज्ञापितः, विश्वासस्य बीजमाहुः **यस्मा**दिति, यस्मात्कारणादस्मिन् तत्प्रकटितमार्गे यः **स्थितः**, **स्थिति**स्तु कायवाङ्मनसां तदेकपरत्वं, तादृशो, यत् **किमपि** विविधं वस्तु **कथमपि** केनापि प्रकारेणापि शास्त्रोक्तातिरिक्तप्रकारेणापि **क्वापि** कस्मिन्नपि देशे उपाहर्तुं समर्पितुमिच्छतीच्छां करोति तद् **गोपिकेशः स्ववदनकमले करोति**, गोपिकेशइतिपदादस्मिन्मार्गे तत्सहित एव सेव्यः, अतस्तत्सहित एव वदनकमले करोति, अङ्गेतिपदात्तत्साक्षादंगीकरोति नतु मार्गांतरवदंगोकारे भावनामात्रं, चारुहासेतिपदाद्रुच्यांगीकारः सूचितः, अन्यथा हासो नोपपद्येत ॥ ४ ॥

## उष्णत्वैकस्वभावोप्यतिशिशिरवचःपुंजपीयूषवृष्टि-
## रार्तेष्वत्युग्रमोहासुरनृषु युगपत्तापमप्यत्र कुर्वन् ।
## स्वस्मिन्कृष्णास्यतां त्वं प्रकटयसि च नो भूतदेवत्वमेत-
## द्यस्मानंददं श्रीव्रजजननिचये नाशकं चासुराग्नेः ॥५॥

पूर्वश्लोके हुताशेतिकथना"द्रुद्रो वा एष यदग्नि"रिति रुद्रेप्यग्नित्व-संभवादाचार्याणामपि तद्रूपाग्निरूपत्वमस्तु नतु भवदुक्तरूपत्वमित्याशंकानिरासाय तद्धर्मवैधर्म्येण स्वोक्ताग्निरूपत्वमुपपत्त्या आहुः **उष्णत्वैक-स्वभाव** इति, उष्णत्वरूपमादाय यद्रुद्रत्वमाशंकितं तदग्रे वक्ष्यमाणैर्भगवन्मुखाधिष्ठातृरूपाग्निधर्मैरत्यंतं विरोधान्न रुद्ररूपत्वमाचार्याणां रुद्रोष्णत्वस्यैतदुष्णत्वस्य च वैजात्यान्नोष्णत्वसाम्यमपि, अन्यानपि विरुद्धधर्मानाहुः अ-त्यंतशिशिराणि तापहारकाणि यानि **वचांसि** तेषां **पुंजाः** समूहास्त एवार्तेषु

जीवनहेतुत्वेन **पीयूषवृष्टयस्ताः** तैरेव वचःपुंजैः **अत्यंतमुग्रसांसारिको मोहो** येष्वेतादृशाश्च ते **आसुरनरश्च** आसुरजीवास्तेषु **युगपदेव** एकस्मिन्नेव समये तापमपि कुर्वन् तेन युगपदेव कार्यद्वयं कुर्वन् **स्वस्मिन् कृष्णास्यतां त्वं प्रकटयसि नो भूतदेवत्वं** नो रुद्रत्वमित्यर्थः, रुद्रस्यासुराणां तापनिवर्तकत्वमेव नतु तत्करणत्वं, तेषां तस्यैवोपास्यत्वात्, उभयकार्यकरणे निदर्शनमाहुः **यस्मादिति,** यस्मात्कारणादेतत्कृष्णास्यं व्रजजनानां निचये समूहे आर्तिहरणादानंददं "पीत्वा मुकुंदमुखसारघ" मित्यनेन, **असुराग्नेर्दावाग्नेर्नाशकत्वं** "तमग्निमपिबदिति" वाक्यात् ॥ ५ ॥

## आम्नायोक्तं यदंभोभवनमनलतस्तच्चसत्यं विभो यत्
## सर्गादौ भूतरूपादभवदनलतः पुष्करं भूतरूपम् ।
## आनंदैकस्वरूपात्त्वदधिभु यदभूत्कृष्णसेवारसाब्धि-
## श्चानंदैकस्वरूपस्तदखिलमुचितं हेतुसाम्यं हि कार्ये॥६॥

अतःपरमाचार्याणां कृष्णास्यत्वेनालौकिककार्यकर्तृत्वेनालौकिकानंदमयत्वं साधयंति **आम्नायोक्तमिति,** **आम्नाये** वेदे सर्गारंभे "तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेराप" इत्युत्पत्तिक्रमनिरूपणं भौतिकानामेव, यतः **सर्गादौ** भौतिका एवोत्पादिता इत्यग्नेस्तदुत्पन्नस्य जलस्यापि भौतिकत्वमेव, **पुष्करं** जलं, कार्यकारणयोरेकजातीयत्वनियमात्, तद्वदाचार्याणामपि अलौकिकानंदमयजलप्रादुर्भावहेतुत्वेनालौकिकानंदमयत्वज्ञापनायाहुः **आनंदैकस्वरूपादिति,** केवलानंदस्वरूपात्त्वत्तः **अधिभु** भुवं अधिकृत्य यस्मात् कृष्णस्य सदानंदस्य **सेवारूपो** यो **रसाब्धिः** परमानंदसमुद्रः **अभूत्** प्रादुर्भूतो जातः तेन कार्यकारणयोरेकजातीयत्वनियमात्तवाप्यानंदमयत्वमेवेति **साम्यं हि कार्ये** इत्युक्तम् ॥ ६ ॥

**स्वामिन् श्रीवल्लभाग्ने क्षणमपि भवतः सन्निधाने कृपातः प्राणप्रेष्ठव्रजाधीश्वरवदनदिदृक्षार्तितापो जनेषु ।
यत्प्रादुर्भावमाप्नोत्युचिततरमिदं यत्तु पश्चादपीत्थं दृष्टेप्यस्मिन्मुखेंदौ प्रचुरतरमुदेत्येव तच्चित्रमेतत् ॥७॥**

अतःपरं धर्मान्तरेणापि लौकिकाग्निधर्मनिराकरणेनालौकिकाग्नित्वमाहुः **स्वामिन्निति,** हे श्रीवल्लभाग्ने स्वामिन् भवतः क्षणमपि सन्निधाने भवत्कृपातः प्राणादपि प्रेष्ठो यो व्रजाधीश्वरस्तस्य वदनस्य या दिदृक्षा दर्शनेच्छा तदंतरायेण या आर्तिस्तज्जनितो यो तापः जनेषु प्रादुर्भवति तदिदमुचिततरं, यथा लौकिकाग्नितापे इंधनस्य हेतुत्वं तथा त्वत्कृपाया इति तथोक्तं, लौकिकाग्निसन्निधानेपि तापस्य दृष्टत्वादेतावत्साम्यमादायोक्तमुचिततरमिति, वक्ष्यमाणधर्माणां सर्वात्मना लौकिकाग्नावसंभवात्तेपु चित्रत्वमाहुः **यत्त्विति,** तुशब्दः पूर्वोक्तसवलौकिकाग्निधर्ममात्रनिराकरणार्थः, पश्चादसन्निधानेपि पूर्वसन्निधानानुभवादित्थं पूर्ववदेव ताप उदेत्येव, ततोप्यत्यंतानिर्वचनीयानुभवमाहुः **दृष्टेपीति,** सन्निधानव्यतिरेकेणापि दर्शनमात्रादपि प्रचुरतरं यथा स्यात् तथा तापोदयस्याश्चर्यत्वाच्चित्रत्वमुक्तं, **तत्** पूर्वोक्तमसन्निधानेपि तापप्राकट्यं, **एतद्दर्शनेनापि** तापप्राचुर्यं चित्रं, **कृपात** इति सर्वत्रानुषज्जते, यद्यपि मुखस्येंदुत्वोक्त्या तद्दर्शनस्य तापहारकत्वमायाति तथापींदावस्मिन्नितिपदोपादानादाचार्यमुखस्येतरेंदुवैलक्षण्यज्ञापनात्तस्य जलप्रकृतिकत्वात्तापहारकत्वमेवोचितमाचार्याणां तु भगवन्मुखाधिष्ठातृत्वेनालौकिकानंदमयाग्निरूपत्वात्तन्मुखस्यापि तादृशत्वात्तद्दर्शनमात्रादपि तादृगानंदरसात्मकतापजननस्याश्चर्यत्वाच्चित्रमित्युक्तं, **एवकारेण** तापोदयस्यावश्यकत्वमुक्तम् ॥७॥

अज्ञानाद्यंधकारप्रशमनपटुताख्यापनाय त्रिलोक्या-
मग्नित्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एव।
प्रादुर्भूतो भवानित्यनुभवनिगमाद्युक्तमानैरवेत्य
त्वां श्रीश्रीवल्लभेमे निखिलबुधजना गोकुलेशं भजन्ते॥८।

॥ इति श्रीविट्ठलेश्वरविरचितं श्रीवल्लभाष्टकं संपूर्णम्॥

पूर्वश्लोकैराचार्याणां पूर्णत्वेपि भगवन्मुखाधिष्ठात्रग्निधर्मवत्त्वेन तद्रूपं निरूप्येदानीमपि तद्धर्मांतरनिरूपणपूर्वकं प्रमाणसिद्धं पूर्णत्वमाहुः, **अज्ञानादिति**, यथालौकिकाग्नेर्गृहांधकारनिवर्तकत्वं तथास्याग्नेरलौकिकत्वाद्विजातीयांधकारनिवर्तकत्वमाहुः, विजातीयांधकारान् गणयंति **अज्ञानाद्यंधकारे**ति, **अज्ञानमादि**र्येषामितिव्युत्पत्त्या आदिपदेन कामक्रोधलोभमोहमदमात्सर्यादयस्त एवांधकारा भगवन्मार्गज्ञाने प्रतिबंधकास्तेषां **प्रशमने** दूरीकरणे या पटुता सामर्थ्यं तत्**ख्यापनाय** तत्प्रसिद्ध्यै **कविभिरपि** पूर्णज्ञानिभिरपि **ते** तव **सदाग्नित्वं वर्णितं**, वस्तुतस्तु त्वत्स्वरूपविचारे क्रियमाणेलौकिकानंदमयत्वात् **कृष्ण एव प्रादुर्भूतः**, अत्र प्रमाणं **भवानि**ति, तथात्वेन ज्ञायमानत्वस्य हेतुत्वाय तुशब्दः पुनस्तथात्वनिश्चये प्रमाणांतराण्यप्याहुः, **अनुभवनिगमाद्युक्तमानै**रिति, तत्रानुभव उच्यते, क्षत्रियः कृष्णदास इति आचार्यसेवकः स्थितस्तत्कृतासाधारणसेवया प्रसन्नैराचार्यैस्त्वं त्वदभिमतं प्रार्थयेत्युक्तस्त्रयं प्रार्थितवान्, सर्वात्मना त्वन्मार्गीयसिद्धान्तज्ञानं ममास्त्वित्येकं स्वस्मिन्विद्यमानमौखर्यक्षमापनरूपं द्वितीयं, आचार्यशरणगमनात्पूर्वं वैष्णवमंत्रोपदेष्टृस्वगुरुगृहगमनप्रार्थनरूपं तृतीयं, आचार्यैः प्रार्थितत्रयमपि दत्त, आचार्यगमनात्पूर्वमेकदा स्वगुरुगृहे

स गतवान्, तं नमस्कृत्योपविष्टं गुरुः पृष्टवान् 'मां विहाय कथं त्वयान्यो गुरुः कृत' इत्युक्तः स उत्तरं दत्तवान्, मद्गुरुस्त्वमेव गुरुप्रसादस्य भगवत्प्रापकत्वात्त्वत्प्रसादान्मम पुरुषोत्तमप्राप्तिर्जातेत्याचार्याः पुरुषोत्तमा एव न गुरवः, पुनस्तद्गुरुणोक्तं 'ते पुरुषोत्तमा इति त्वदुक्ते किं प्रमाणं' ? इत्युक्तः कृष्णदासो ज्वलदग्निमंजलिना गृहीत्वेदमुक्तवान् 'यदि ते पुरुषोत्तमास्तदा मामग्निर्न ज्वालयिष्यति नो चेज्ज्वालयिष्यती'त्युक्त्वा मुहूर्तमात्रं तथा स्थितवान्, तदा गुरुस्तदुक्तेर्थे सत्यत्वं ज्ञात्वा तद्गृहीतमग्निं भीतः स स्थानस्थितं कारितवान्, इत्यनुभवरूपमेकं प्रमाणं, निगमे पुरुषोत्तमस्यैव ब्रह्मशब्दवाच्यत्वात्तस्यानंदमयत्वनिरूपणादत्रापि तथात्वात्स एवात्रापि प्रमाणं, आदिपदेन तत्स्वरूपानुभवकर्तृणां भक्तानामंतःकरणानि प्रमाणत्वेनोक्तानि, तैः प्रमाणैरवेत्य सम्यग्ज्ञात्वा **बुधजनाः** पूर्वोक्तज्ञानपूर्णा भूत्वा **गोकुलेशमेव त्वां भजंते,** वारद्वयं श्रीपदप्रयोगात् श्रियः परमानंदशक्तिभेदेन द्विरूपत्वात्तदुभयवल्लभत्वोक्त्या त्वयि पुरुषोत्तमत्वं ज्ञापितम् ॥ ८ ॥

पितृपादाब्जकृपया विवृतं वल्लभाष्टकं ।
क्षमयंतु सदाचार्या भृत्ये श्रीवल्लभे मयि ॥ १ ॥
इति श्रीपितृपादाब्जपरागारक्तचेतसा ।
श्रीवल्लभेन विवृतमखिलं वल्लभाष्टकम् ॥ २ ॥
श्रीमदाचार्यरूपं श्रीविट्ठलेशोदिताष्टकं ।
श्रीवल्लभोज्ज्वलं भक्त्या मज्जन्त्वस्मिन् त्रिसंगमे[1] ॥ ३ ॥

इति श्रीमत्प्रभुचरणैकशरणश्रीश्रीवल्लभविरचितं
श्रीवल्लभाष्टकविवरणं संपूर्णम् ।

---

१ असार्धत्रिकमिदं पद्यम् ॥

## श्रीगोकुलेशकृतश्रीवल्लभाष्टकविवरणोपरि

# ॥ श्रीपुरुषोत्तमविरचिता श्रीवल्लभाष्टकविवृतिः ॥

नत्वा श्रीवल्लभाचार्यचरणाब्जरजांस्यहम् ।
तदष्टकीयविवृतेर्भावं वच्मि कृपाबलात् ॥ १ ॥

तत्र पूर्वमुपोद्घाततयेदमुच्यते, सर्वश्रुतिशिरस्सु परब्रह्मण एव परमतत्त्वं सच्चिदानंदरूपेण वैयासदर्शनसिद्धं, तच्च नानाप्रस्थानैर्निर्विशेषसविशेषभेदेन प्रकृतिसंबंधशून्यतद्युक्तत्वाभ्यां विष्णुशिवादिरूपेण च बहुधा विचारितं, यत्र पुनर्विष्णुरूपं विचारितं तत्रापि श्रुतिपुराणादिभिः पुरुषोत्तमत्वेन निर्णीतं नतु सच्चिदानंदरूपकृष्णाकारतया, तथा फलविचारेपि स्वस्वरूपावस्थानपुरुषोत्तमप्राप्तिशिवप्राप्त्यादिरूपेण फलं विचारितं नतु " ब्रह्मविदाप्नोतिपर " मिति ब्रह्मणो विवरणगुत्तरार्धोक्त[1]ब्रह्मसहभावकसप्रधानकसर्वकामभोगात्मकपरप्राप्तिरूपेण, काम्यन्त इति कामाः सत्यसंकल्पत्वादयः कल्याणगुणा ब्रह्मणा सह तानश्नुते, दहरविद्यायां " तस्मिन् यदंतस्तदन्वेष्टव्य" मितिवद् गुणप्राधान्यं वक्तुं सहशब्दः, वेदनमुपासनं, फलोपासनयोः प्रकारैक्यं " यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवती"तिविवरणात्, व्यासचरणैस्तु वेदव्यासं कतिचित् पुराणानि कृत्वा वेदार्थप्रकाशकभारतजिज्ञासासूत्रकरणोत्तरमप्यपरितुष्यद्भिर्नारदोपदेशेन समाधावनुभूय भक्त्युत्पादकसंहितारूपं श्रीभागवतं प्रकटीकृत्य शुकं पाठयित्वा परितुष्टं, श्रीभागवते च

१ "सैषाभ्युक्ता सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्" "यदक्षरे परमे प्रजा" इत्युक्त्वाथ "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति.

"कृष्णस्तु भगवान् स्वय"मितिसूतोक्तिमुखेन प्रतिज्ञाय दशमैकादशयो-स्तत्रैव रूपे परब्रह्मत्वं बोधितं, एकादशे चोद्धवोद्देश्यकभगवदुपदेशमुखेन "अथैतत् परमं गुह्यं शृण्वतो यदुनंदन सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत् सखे"त्यादि "तस्मात्त्वमुद्धवोत्सृज्य नोदनां प्रतिनोदनां प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च मामेकमेव शरणमात्मानं सर्वदेहिनां याहि सर्वात्मभावेन यास्यसे ह्यकुतोभय "मित्यंतवाक्यसिद्धव्रजभक्तरीतिकसर्वात्मभावस्य साधनत्वं तल्लभ्यफलस्यैव फलत्वं च बोधितं, तेन व्यासचरणानामप्ययमेवाशयः, सोयं यदि कैश्चिदपि ज्ञातः स्यात् प्रकटित एव स्यात् तदप्राकट्ये "असाधनं साधनं करोती"त्यादिरूपो भगवदनुभावोप्रकटित एवेति तदर्थं पूर्वोक्तरूपो भगवान् स्वानुभावप्रकटनार्थमाज्ञापूर्वकं तत्राप्यनधिकारिणामुक्तफलस्य लौकिकधर्मसंकीर्णतया दुर्लभत्वाय श्रीमदाचार्यान् प्रकटयामास, तदिदं मन्दमध्यमादीनामसत्संगादिदोषेणागोचरमिति तेषामेव भवति संदेहः, अंतर्यामिब्राह्मणे "यस्यात्मा शरीर"मित्यनेन जीवात्ममात्रस्य भगवच्छरीरत्वे श्राविते प्येकादशे श्रीमदुद्धवे "यंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ती"त्यनेनाचार्यचैत्यस्य वपुः स्पष्टमुक्तं, श्वेताश्वतरोपनिषदि च "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन" इतिमंत्रेण देवगुरुभक्त्योः साम्यं श्रावितं, तेन जीवमात्रे परस्य भोक्तृरूपेण स्थिति"राचार्यचैत्ये" तु "तनुभृदंतर्बहिरशुभं विधुन्व"त्सामर्थ्यपूर्वकमिति, वं सुखं पुष्णातीति वपुरित्याचार्यचैत्यस्य वपुः स्पष्टं, अतः श्रीमदाचार्येष्वप्याचार्यान्तरवद्देवावेशरूपा भगवत्स्थितिरुक्त "यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः तैस्तैरतु-

स्यातिशयैर्वीर्यै र्देहिष्वसंगतै''रितिदशमस्थनलकूबरवाक्यादुक्तमार्गप्रकटनवीर्यलिंगेनावतारत्वं ? यद्यवतारत्वं तदापि किं शेषासन्यादिरूपरामानुजमध्वाचार्यादितुल्यत्वमुत कश्चिद्विशेष इति ? तस्यैतस्यानपाकरणे " संशयात्मा विनश्यती''तिवाक्यादुत्कृष्टगुरुभक्त्यभावाच्च श्रीमदाचार्योक्तार्थाप्रकाशनेन तेषां कृतार्थता न स्यादिति श्रीमदाचार्यस्वरूपयाथात्म्यपरिचायनेन तमपाकर्तुं **श्रीमत्प्रभुचरणाः श्रीवल्लभाष्टकं** चक्रुः, तदपि व्याख्यानमंतरेण न सुबोधमिति **श्रीगोकुलनाथास्तद्विवरीतुं** प्रतिजानते **यत्पादरजसे**त्यादिद्वाभ्यां, आद्यं श्लोकमवतारयितुं संदेहबीजं वदन्त आहुः **नन्वि**त्यादि, **धर्माणा**मिति अनुभूयमानानुभावानां कर्मणां, **तदीयाना**मिति उत्तमसेवकानां, **तादृशस्ये**ति अलौकिकस्वरूपधर्मकस्य, **जन्मादीनामिति आदिपदेनेंद्रियांतः**करणधर्माणां ग्रहणं, **तदीयाना**मिति मंदमध्यमानां,**संदेहइ**ति व्याख्यातरूपः, **तदीयाना**मिति श्रीमदाचार्यस्वरूपधर्माणां, **जन्माभात्रार्थ**मिति जन्माभावज्ञापनार्थं, शेषमुत्तानं, व्याख्यानग्रंथे **उच्यत** इति इतरस्योच्यते, **श्रीनिवासा**दिति, तथा च श्रीनिवासकृतशोभाया इतरत्राभावादितिभावः, **आर्द्रीकरणत्व**मिति पचादित्वाल्ल्युः, **इतोपी**ति भगवदधिपतिकत्वादित्यर्थः, **धर्मा निरूपिता** इति स्वरूपभूताः कार्यभूताश्च मूलधर्मा इत्यर्थः, तेन मूलस्वरूपादभेदोत्र **बोधनार्थं** प्रतिज्ञात इति ज्ञापितं, **असंभावितत्वादि**ति ब्रह्मादिप्रार्थनवदत्र प्रार्थनादेरभावेन तथात्वादित्यर्थः, **तथापी**त्यादि तथाचेच्छैवात्र हेतुरिति नासंभावितत्वमित्यर्थः, तेन मूले स्वस्येच्छयेत्यनुक्त्वा तस्याज्ञयेत्यादिकथनात् श्रीकृष्णावतार इवात्रापि मूलरूपत्वावतारत्वाभ्यां प्राकट्यं गुप्ततयाभिप्रेतमित्याज्ञाहेतुसूचनार्था द्वितीया प्रतिज्ञेति बोधितं, **तद्भावाना**-

मिति लीलास्थभक्तभावानां, **तेनेति** आज्ञायाः सप्रयोजनकत्वेन, आसुरमोह-नार्थं प्राकृतानुकृतेरावश्यकत्वेन, भूमौ **योसौ** मनुष्याकृतिरितिवक्तव्ये यत्स-त्पदमुक्तं तत्तात्पर्यमाहुः **प्रादुरित्यादि, प्रादुर्भावहेतुरिति** जीवोद्धारे तत्स्व-भावपरावर्तनश्रमबाहुल्यं सोढ्वाप्येवमतिकरुणत्वं प्रादुर्भावहेतुरित्यर्थः, तेना-ज्ञाया एतेभ्य एव दाने बीजसूचनरूपा तृतीया प्रतिज्ञेति सूचितं, प्रपदनकर्म-निरूपणेनावताररूपनिश्चायनार्था चतुर्थी प्रतिज्ञेत्याशयेनाहुः **यच्छब्द-स्येत्यादि, शरणागतेरिति** श्वेताश्वतरोक्तगुरुभक्तिज्ञापकशरणागतेः, तथाच तदर्थमेवात्र प्रपदनकर्मत्वेनोक्तिरितिभावः, **असंभवादिति** विवक्षितकार्य-कर्तृत्वासंभवात् ॥१॥

एवं प्रतिज्ञावाक्यार्थं व्याख्याय हेतुवाक्यानि व्याख्यास्यंतः पूर्वोक्त-संदेहस्थामात्यार्थान्तरसामान्यकोटिं तर्कैर्वारयितुमापाद्यनिरूपणमुखेन विव-क्षितानुभावप्रकटनसामर्थ्यरूपमाज्ञाहेतुं सूचयंतो द्वितीयां प्रतिज्ञां हेतुभिः साधयंतीत्याशयेनाहुः **एवमित्यादि,** मूले **आविर्भयादिति**संभावनार्थे लिङ्, आर्धधातुकत्वाभावेपि तर्कस्यानिष्टप्रसंजनरूपत्वेनाभावमुखेनेष्टसाधकत्वादा-पादकापाद्याभावरूपयोराचार्याविर्भावदैवसृष्टिवैयर्थ्याभावयोरिष्टत्वेनोत्कंठयाशा-स्यत्वादाशीर्लिङ्प्रयोगः, **अधिधरणितलमिति** विभक्त्यर्थेनाव्ययीभावः, तदेवोक्तमधिकृत्येत्यनेन, **स्वाधिकरण** इति भगवतीत्यर्थः, **मर्यादा-पुष्टिभेदेनेति** मंदमध्यमानामक्षरसायुज्योत्तरं भगवदिच्छया लीलासंबंधस्या-"क्षरधियां त्ववरोध" इतिसूत्रे निर्णीतत्वात् सोपि मोक्षोत्र कार्यत्वेनोक्तः, **वेद-मूलत्वादिति** वेदमूलतया प्रसिद्धत्वात्, कल्पने बीजं वदंतीत्याहुः **मतेत्यादि, मायावादन्यायमीमांसाद नीति** "अक्षपादप्रणीते च काणादे सांख्ययोग-

योः त्याज्यः श्रुतिविरुद्धांशः श्रुत्येकशरणैर्नृभिः जैमिनीये च वैयासे न विरोधोस्ति कश्चने''तिपराशरीयपुराणवाक्ये न्यायादिषु विरोधस्य जैमिनीयवैयासयोस्तदभावस्योक्तत्वेपि प्रस्थानभेदैस्तदर्थस्य व्याकुलीकरणान्मोहकत्वेनासन्मार्गत्वमित्यर्थः, विरोधं दर्शयितुं वैदिकार्थं पूर्वमाहुः तद्यथेत्यादि, अत्र " ब्रह्मविदाप्नोति पर ''मित्यनेन पुष्टिमार्गीयो मोक्ष उक्तः, द्वितीयया मुख्यगौणभेदेन मर्यादामार्गीय उक्तः, सलोकतापदं साष्टर्याद्युपलक्षक, 'ब्रह्मणः सायुज्यं सार्ष्टि समानलोकतामाप्नोती'तिश्रुत्यन्तरात्, श्रुत्यर्थनिश्चायनायाहुः गीतायामित्यादि, श्रुतिविरोध प्रकटयन्ति मायावादिभिरित्यादि, कल्पितेति अविद्यायां ब्रह्मप्रतिबिम्बो जीव इति मोक्षश्चाविद्यानाश इत्यंगीकारात् तथेत्यर्थः, वेदेति चः पुराणसमुच्चयार्थः, तन्मतमपीत्यपिना साधनांशेपि " तमेव विदित्वे''त्यादिश्रुतीनां विरोधः सूच्यते, यागसाधनेत्यादि यागसाधनानि प्रयाजास्तत्साध्यो यः स्वर्गलोकः 'सुवर्गाय वा एतानि लोकानि हूयंत' इतिश्रुत्युक्तस्तस्य मुक्तित्वकथनात्तत्सामान्येन वाक्यशेषोक्तसुखेप्यसुरोपघाताभावमाकल्पस्थायित्वं चादाय लोकपरतास्थापनात्तत्रात्मसुखपक्षेपि जैवानंदस्य परिच्छिन्नत्वात् "यं यं कामं कामयते सोस्य संकल्पादेव समुत्तिष्ठतो''त्यादिश्रुत्यन्तरे आत्मानममृतादिलिंगैर्ब्रह्मेति निगमयित्वा "एवंवित् स्वर्गं लोकमेती''त्युपसंहारेणोक्तश्रुतावप्यभिलापादिलिंगैर्ब्रह्मानंदानुभवस्यैव स्वःपदवाच्यत्वात्स्वर्गलोके चकाराज्जीवात्मसुखे चैतल्लक्षणाभावात्तथेत्यर्थः, एतेन'निःसंबंधो निरानंदो मोक्ष' इत्यपि संगृहीतं ज्ञेयं, ध्वांतत्वमिति मार्गाणां ध्वांतत्वं, शेषं स्फुटार्थं, अत्र मायावादमात्रग्रहणाद्रामानुजमध्वप्रस्थानयोः संग्राह्यैकदेशत्वं वैष्णवत्वं ज्ञेयं, तत्र साधनं भक्ति-

मार्गीयो भाव इति पोषापीशपदमिति च, अत्रेदं हृदयं, पूर्वतंत्रेग्निहोत्र-दर्शपूर्णमासज्योतिष्टोमेषु स्वर्गस्य फलत्वे कथिते कर्मस्वरूपत्वबाहुल्याभ्यां भाट्टादिभिः स्वर्गे वैजात्यमंगीक्रियते पुराणादिष्वपि कर्मभेदेन नाना स्वर्गाः प्रदर्श्यन्ते उत्तरतंत्रेपि 'यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथैव प्रेत्यापि भवती'तिछंदोगश्रुतिसिद्धे तत्क्रतुन्यायेन साधनफलयोः प्रकारैक्यं निश्चाय्यते, तेन साधनवैजात्ये फलवैजात्यमविवादं, तथा "जाग्रत्स्वप्नसुषुप्तिमतीत्य तुरीयातीतो गोपाल ओम् तत्सद्भूर्भुवः सुवस्तस्मै वै नमोनम"इति गोपालोत्तरतापनीये विश्वाद्याधिदैविकसहितजाग्रदाद्यतीतत्वश्रावणेनावतारेष्वपि कृष्णावतारस्य श्रेष्ठत्वश्रावणेन गांधर्वीदुर्वाससोः संवादसंदर्भेण च तस्मिन्नेव तदाकारके परत्वं विश्राम्यते, गीतास्वप्य"हं सर्वस्य प्रभव" इत्यादिसंदर्भेण "मन्मना भवे"ति "सर्वधर्मानि"तिसर्वगुह्यतमोपदेशमुखेन च श्रुत्युक्तं परत्वं स्वस्मिन्नेव निश्चाय्यते, तेन तत्र परत्वमप्यविवादं, तथा साधनविचारेपि 'अहं सर्वस्ये'तिपद्ये पूर्वार्धेन स्वमाहात्म्यमुक्त्वोत्तरार्धे भावपूर्वकभजनमेवोक्तं, भावश्च रतिरेव, 'रतिर्देवादिविषयो भाव' इत्यादिवाक्यात्, सापि धर्मांतरमेव नतु ज्ञानं, एकादशे "अथैतत् परमं गुह्यं शृण्वतः" "सुगोप्यमपि वक्ष्यामी"ति प्रतिज्ञाय योगादिसाधनासाध्यत्वनिरूपणपूर्वकं 'केवलेन हि भावेन गोप्यो गाव' इत्यादिना भावेन गोपीगोखगमृगादिनागांतानां स्वप्राप्तिमुक्त्वा 'भावेपि मुख्यं भावं निष्कृष्टुं 'रामेण सार्धं' मित्यादिसंदर्भेण "मत्कामा रमणं जारं मत्स्वरूपाविदोबलाः ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रश इतिसंगस्यैवोक्तत्वेन चित्तासक्तेरेव सूचितत्वात्, नापीच्छा प्रीणाम्यनुरज्यामि नेच्छामीत्यनुभवेनैव ततो भेदाध्यवसायात्, एवं सति तादृशभावरूपसाधनेन

या परप्राप्तिः सा तत्क्रतुन्यायेनोक्तरूपैव सिध्यति, इयं च लक्ष्म्या अपि सुदुर्लभा "नायं श्रियोंग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोन्याः रासोत्सवेस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद् व्रजवल्लवीना"मिति श्रीमदुद्धवस्य "न तथा मे प्रियतम आत्मयोनिर्न शंकरः न च संकर्षणो न श्रीर्नैवात्मा च यथा भवा"निति भगवता स्तुतस्य वाक्या"दासामहो चरणरेणुजुषामहं स्या"मितितच्चरणरेणुप्रार्थनाच्च, तेन फलसाधनयोरुत्कर्षस्यात्रैव विश्रांतिः, तदिदं श्रीमदाचार्यचरणैरेव प्रकटितमिति रामानुजाचार्यमध्वाचार्यादिभिर्मायावादं निराकृत्य भगवत्सायुज्यलक्ष्मीसायुज्यादिरूपमोक्षस्य स्थापनेपि "सोश्नुत"इतिश्रावितस्य फलस्यानंदमयाधिकरणस्वतंत्रवर्णकोक्तरीत्या घोषाधीशप्राप्तिरूपत्वेनाविवेचनात् लिंगभूयस्त्वाधिकरणोक्तरीत्या सर्वात्मभावरूपसाधनस्याविवेचनाच्च तन्मते नैतत्प्राप्तिरिति नाचार्यचरणाविर्भावस्य गतार्थत्वमितिभावः वैश्वानरत्वेनेति, 'विश्वान्नरान्नयती'तियास्कोक्तनिरुक्तया सर्वजननयनसामर्थ्यबोधनेनेत्यर्थः, एवं चात्र घोषाधीशवैश्वानरपदाभ्यां यथायथ'मसाधनं साधनं करोती'त्यादिरूपानुभावप्रकटनाभिप्रायरूपो भगवन्निष्ठः सामर्थ्यरूप आचार्यरूपनिष्ठश्चाज्ञाहेतुरत्र समर्थ्यत इति सूचितं, अत्र सिद्धस्तर्क एवं प्रयोक्तव्यः, यदि विवक्षितानुभावप्रकटनाय भवानाविर्भूतो न स्यात् दैवानां रसात्मकपरप्राप्तिरिदानीं न स्यात्, यदि नेदानीं स्यात् पुष्टिजीवदैवानामिदानीं सृष्टिर्व्यर्था स्यात्, यदि तथा न स्यात् नेदानीं स्यात्, यदि न सा स्यात् "अभयं सत्त्वसंशुद्धि"रित्युक्तलक्षणका घोषाधीशकथारुचयो न दृश्येरन्निति, यद्येतत्सामर्थ्यमन्यत्र स्यान्न युष्मान् प्रकटयेत्, यतो नैवमतो नैवमिति च, एवं तर्कनिरूपणेनात्रानुमान-

मप्यभिसंहितं, तत्प्रयोगस्तु श्रीमदाचार्यप्रादुर्भावः भगवदभिसंहितावश्यककार्यजनकः भगवदाज्ञप्तत्वात् श्रुत्यादिप्रादुर्भाववत्, भगवदाज्ञप्तः भूतनाथोक्तमार्गध्वांतांधनिवारकत्वात् व्यासाविर्भाववदिति, एवं प्रादुर्भावावश्यकत्वसमर्थनेनेतरतुल्यत्वातिशययोर्निवारणादाद्यकोटिं निवार्यावतारत्वं समर्थितम्॥२॥

ननु निवृत्ते ध्वांते आंध्यनिवृत्तेर्दृष्टत्वादुक्तध्वांतस्य रामानुजाचार्यादिभिर्निवारणे कृतेपि सामर्थ्यस्य सिद्धत्वादुक्तहेतोराचार्यान्तरसाधारणत्वेन तेषामाज्ञप्तत्वसिद्धौ उक्तप्रयोजनस्यापि सिद्धिरित्याशंक्य साधारणत्वनिवारणायाचार्येषु वक्ष्यमाणप्रमाणैः परिचायनीयमग्नित्वं सिद्धवन्निरूपयंतोन्यत्रासामर्थ्यं वदन्तीत्याशयेनाहुः **ननु सन्मार्गेत्यादि, अलौकिकाग्ने**रित्यादि "मुखमस्य विनिर्भिन्नं लोकपालोनलोविशत् वाचा स्वांशेन येनासौ वक्तव्यं प्रतिपद्यत" इत्यादिवाक्यैर्वाचोग्न्यंशत्वेनाग्नेरंशित्वाद्वागीशत्वं सिद्धं तच्च वागीशत्वं समानन्यायेनाधिदैविकत्वेपि तुल्यं "तेजोमयी वागि"तिश्रुतेश्च, तथा उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा" इतिश्रुत्यन्तर दृष्टान्तमुखेन पत्यौ स्वाशयं जाया प्रकटयतीतिकथनात्सिद्धे वाक्पतित्व एतेषामेव श्रुत्यर्थज्ञानादेतेषामेवैतदर्थमाज्ञप्तमित्यर्थः, श्रुतौ त्वशब्दोन्यार्थकः, अतः कस्मैचिदेवाभिप्रायं वाग्बोधयतीति सिध्यति तत औचित्यात्स्वपत्युरग्र एव सर्वं बोधयति, तेनाचार्याः भगवदभिप्रेतानुभावप्रकटीकरणसमर्थाः भगवदाज्ञारूपश्रुतिभावज्ञानसमर्थत्वात्, यदेवं तदेवं व्यासवद्यन्नैवं तन्नैवं शेषादिवदितिपूर्वोक्तसामर्थ्योपपादकानुमानांतरेण साधारण्यनिवृत्तेर्भगवदाज्ञप्तत्वरूपे पूर्वोक्तहेतावप्यभिसंहितानुभावप्रकटनसामर्थ्यालोचनपूर्वकमितिविशेषणोपादा-

9272

नाददोष इतिभावः, एवं सतर्केणानुमानगर्भेण सार्धेन द्वितीयप्रतिज्ञा साधयित्वा श्रीमदाचार्योक्तज्ञानोत्तरमपि येषां विपरीतभावना न निवर्तते तत्संगत्यागार्थं तेषां फलं स्वरूपं च वदन्तीत्याशयेनाहुः तदुक्तार्थेत्यादि, "**मायेत्यसुरा इती**"ति, अनया श्रुत्या मायाया असुरोपास्यत्वे सिद्धे उपासनाविषयेषु मायिकत्वं वदतामासुरत्वमेवेतिभावः, शेषं स्फुटार्थम् ॥३॥

ननु श्रुत्यर्थज्ञाने **व्यासचरणाः** समर्था इति त एव पुनः कुतो नाज्ञसा त्याकांक्षायां व्यासचरणापेक्षयापि किंचिद्विशेषं सूचयंतः पूर्वोक्तमानस्याबाधितप्रत्यक्षमूलकत्वं वदन्तीत्याशयेनाग्रिमश्लोकमवतारयन्ति तत्प्रादुर्भावेत्यादि, **स्वसंतोषार्थ**मिति स्वांगीकृतजीवानां स्वरूपादिषु विश्वासदार्ढ्यजननेन स्वकृतार्थत्वज्ञानेन चानंदायेत्यर्थः, सर्वोपि स्वार्थे प्रवर्तते भवंतस्तु परार्थमपि स्वार्थ इव प्रवृत्ता इत्यतिकरुणत्वज्ञापनाय व्याख्यानान्तरमप्याहुः **यद्यपी**त्यादि, " अर्चिष्यंति मनुष्यास्त्वा " मितिवदाचार्याणामपि भोगो भगवतोभिसंहितस्तत्रापि स्वाभेदेन नतु पृथकत्वेनेति बोधयितुमाहुः उतेति, **समुच्चय** इति, तेन मुख्यं कार्यमनुभावप्रकटनं गर्भसंकर्षणादिवत्, इदं तु गौणत्वेपि मुख्यं लीलावदित्यर्थः, तेनेति **किंचे**ति च, उक्तेर्थे परिचायकं वदन्तीत्याहुः **विश्वासबीज**मित्यादि, एवं चात्र श्रीमदाचार्यप्रकटितसेवामार्गो भगवत्प्रियत्वसाधकभक्तिरूपः स्वसम्बन्धेन विलक्षणरुचिपूर्वकभगवद्भोजनसाधनत्वात्, यन्नैवं तन्नैवं मार्गान्तरवत् यदेवं तदेवं व्रजभक्तमार्गवदिति, स भूतनाथोदितमार्गध्वांतांध्यनिवारकः उक्तफलरूपभावानुभावकत्वादिति चानुमानं सिध्यति, ततश्च श्रीमदाचार्या अतिकरुणा ईदृशमार्गप्रवृत्तिहेतुत्वात् भगवद्वदित्यनेनाज्ञापनबीजभूतविशेषसिद्धिरित्यर्थः, एतेन तृतीया

प्रतिज्ञा साधिता, किंचात्र हुताशेतिसंबोधनाद्भगवद्भोजनरूपफलानुभवेन श्रीमदाचार्योक्ते विश्वासदार्ढ्या"दर्थं तस्य विवेचितु"मितिश्लोकोक्तार्थे निश्चयोत्पत्त्या पूर्वोक्तवैश्वानरत्ववागीशत्वादीनां सर्वेषां निश्चयो भवतीति ज्ञापितम् ॥ ४ ॥

एवं हुताशावतारत्वे निश्चायितेपि हुताशानामनेकत्वात्प्रपदनकर्मभूतश्रीहुताशननिष्कर्षेण तुरीयप्रतिज्ञासाधनाय "ईशानः सर्वविद्यानां" "वंशस्तु भगवान् रुद्रः" "वेदः शिवो शिवो वेदो" "रुद्रो वा एष यदग्नि"रित्यादिश्रुतिभिः पूर्वोक्तधर्मवत्त्वं तत्रापि संभवतीति रुद्रत्वं वारयितुमग्रिमः श्लोक इत्याशयेन तमवतारयन्ति पूर्वश्लोक इत्यादि, आशंकितमिति रुद्ररूपाश्च अग्नित्वात् लौकिकाग्निवत् अग्निरूपा उष्णत्वैकस्वरूपत्वात् अग्न्यंतरमित्यनुमानेनाशंकितमित्यर्थः, तद् दूषयन्ति तदित्यादि, तदितिपदं नेत्यनेन सम्बध्यते, तत्र हेतुर्वक्ष्यमाणैरित्याद्युक्तः, वक्ष्यमाणैरिति इत आरभ्य चतुर्षु श्लोकेषु वक्ष्यमाणैरित्यर्थः, तथा च तैर्विरोधे रुद्रत्वसाधकस्याग्नित्वादेर्हेतोस्तैः सत्प्रतिपक्षत्वात् सूर्यसाधारणत्वाच्च न तेन रुद्रत्वसिद्धिरितिभावः, ननु विजातीयत्वविशेषितेनोष्णत्वैकस्वभावत्वेन हेतुनाग्नित्वसिद्धौ सुखेन रुद्रत्वासिद्धिरित्यत आहुः रुद्रोष्णेत्यादि, तथाचैवंविशेषणेग्न्यंतरस्यापिसिद्धेर्हेतोरर्थांतरदोष इत्यर्थः, अन्यानिति रुद्रत्वाभावसाधकान्, कृष्णास्यतामिति "नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेने"त्याद्युक्तामित्यर्थः, शेषं त्वतिरोहितार्थं, तात्पर्यं त्वत्र केवलं स्पर्शविशेषात्मकविजातीयोष्णत्वैकस्वभावत्वं न भगवन्मुखाग्नित्वसाधकतया विवक्षितं किंतु विवक्षितयुगपद्विरुद्धकार्यद्वयकर्तृत्वविशिष्टमतो न दोष

इति, प्रयोगस्तु श्रीमदाचार्या भगवन्मुखाग्निरूपा आर्ततापनिवृत्तिमहामुग्धासुरतापयोर्युगपदुत्पादकवचःपुंजपीयूषवर्षकत्वे सत्युष्णत्वैकस्वभावत्वात् भगवन्मुखाग्निवदिति कालभेदरूपभेदाभ्यामेकस्यैव दृष्टांतदार्ष्टांतिकभावेप्यदोषः शास्त्रांतरेपि तथांगीकारात्, अथवा युगपदार्तितापनिवृत्त्यसुरतापरूपकार्यद्वयजनकवचःपीयूषवर्षकत्वादिति कवलव्यतिरेकी हेतुः, व्य तिरेके शिवादिश्च दृष्टांतः, अतो न शंकालेशः ॥ ९ ॥

नन्वस्तु भगवन्मुखाग्निरूपत्वं तथाप्यानंदत्वे किं मानं, सांसारिकतापनिवृत्त्यासुरतापयोर्युगपदुत्पादकत्वस्य ज्ञानेपि दर्शनाद् ज्ञानरूपताया एव सिद्धेरित्याकांक्षायां पूर्वोक्तसेवामार्गप्रकटयितृत्वेन हेतुनानंदमयत्वसिद्धिं हृदि कृत्वाग्रिमं वदन्तीत्याशयेन व्याख्येयं श्लोकमवतारयंति अतःपरमित्यादि, तत्र **लौकिकाग्नित्वमाशंक्येति** अलौकिकभगवन्मुखरूपेग्नौ सच्चितारविनाभूतत्वेन "तत्तेज ऐक्षत" तीक्ष्णक्रियाकर्तृतया चेतनत्वेन च ज्ञानरूपत्वसिद्ध्या औपनिषदजनप्रसिद्धभूताग्नित्वमाशंक्येत्यर्थः, **इत्युत्पत्तीति**, इतिः प्रकारवाची "तत्तेज ऐक्षत" "बहु स्यां प्रजायेये"ति "तदपोसृजते"तिच्छांदोग्यश्रुतेः संग्राहकः, **भौतिकानामेवेति** एवकारोप्यर्थे, तथा च छांदोग्ये "तेजसोपां सृष्टिमुक्त्वा "तस्माद्यत्र क्वचन शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्त" इतिनिदर्शश्रवणादित्यर्थः, छांदोग्यश्रुत्युपन्यासस्त्वग्निशब्दाभावात् तस्या अपि क्रमसाम्येनैतदैकार्थ्यबोधनार्थत्वाच्च, **एवकारस्याप्यर्थतां** विशदयन्ति **यतइत्यादि**, यतः सर्गादौ निदर्शनतयोच्यमाना उत्पादिता भौतिका एव इतिहेतोः, मूले **चशब्दसमुच्चितस्याग्नेर्जलस्य** च भौतिकत्वमेवाभिप्रेतमित्यर्थः, यद्वा भौतिकपदं सद्रूपत्वाभिप्रायकं

तेन न कोपि शंकालेशः, न्यायमते भूतत्वमूर्तत्वसांकर्येण [1]जातित्वानंगीकारादयं टीकायां प्रयासः, श्रौते तु मते मनसोन्नमयत्वेन भूतांतःपातितया मूर्तत्वभूतत्वयोर्व्याप्यव्यापकभावात्साजात्यं निर्बाधमिति मूले तथोक्तं, **विभो** इति सम्बोधनात्तत्रापि रूपांतरेण भवतामेव जात्युत्पादकत्वमिति बोधितं, एवं दृष्टान्तं विविच्य दार्ष्टांतिकं वदन्तीत्याहुः **तद्वदित्यादि**, तथा च श्रीमदाचार्याः आनंदैकस्वरूपाग्निरूपा आनंदैकस्वरूपकृष्णसेवारसाभिन्नत्वाद् योग्निर्यदम्बुजनकः स तत्सजातीयः भूतजलजनकभूताग्निवदिति कार्यलिंगानुमानमेवानंदमयत्वं साधयत् पूर्वोक्तं भूताग्नित्वं निवारयतीत्यर्थः, अत्रेदं हृदयं, शब्दप्रामाण्यवादिभिस्तार्किकादिभिरप्यग्निजलयोर्भूतत्वं निमित्तनैमित्तिकभावश्चाद्रियते सत्कार्यवादिभिश्च सत एव सदुत्पत्तिं वदद्भिस्तथांगीक्रियते, अतोवांतरजातिमनादृत्य व्यापकजात्यैव हेतुसाम्यं सर्वसंमतं, आयसपात्रादिनिर्माणे आयसघनादेः कारणत्वादवांतरजातिमादायापि साजात्यं लोके दृष्टमौपनिषदे च मतेग्निजलयोरुपादानोपादेयभावस्तयोरैकजात्यं तु लोकेप्यविवादं, अतो द्विविधेपि कार्यकारणभावे तयोरेकजातीयत्वस्यैव सर्वतंत्रसिद्धत्वात्कृष्णसेवारसस्येच्छात्वे धर्मांतरत्वे आनंदरूपत्वस्यानुभूयमानत्वात्तत्कारणभूतानामाचार्याणामानंदरूपत्वं निर्बाधमेव, एतज्ज्ञापनायैव मूले हीत्युक्तं, वस्तुतस्तु "समासीन आत्मा जनानां" "रसो वै सः" "यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुख"मित्यादिश्रुतीनामानंदमयाधिकरणस्वतंत्रवर्णकोक्तरीत्या लिंगभूयस्त्वाधिकरणोक्तरीत्या च विचारे विभावानुभावव्यभिचारिभावकारणाभिव्यक्तिस्वभावो भगवानेव रसः स च रसशास्त्रमर्यादया करणसामर्थ्यानुसा-

1 एकजातीयत्वनियमादिति.

रेणाभिव्यज्यते, एवं सति लौकिकैः पूर्वोक्तकरणैरभिव्यज्यमानश्चाक्षुषादिज्ञानवल्लौकिक एवांशतः प्रकटो भवति, अलौकिकैस्तैस्त्वभिव्यज्यमानः शास्त्रीययोगजभगवत्कृतज्ञानवदुत्तरोत्तरोत्यंतालौकिकः पूर्ण एव मायामपसार्य वेणुगीतपंचाध्याय्याद्युक्तरीत्या प्रकटो भवतीति निश्चीयते, तथा च द्वापरान्ते वेणुगानादिभिर्भगवता यथायथं रसमार्ग आविर्भावित तथेदानीमाचार्यैरुपदेशेनाविर्भावित इत्यत्रापि कार्ये सपरिकरं हेतुसाम्यमिति प्राकृतानुकृतिभोगोत्र किंचिदधिक इति च ज्ञापनाय **हीति अखिलमुचितमिति** चोक्तं, तेन सपरिकरोपि विचार्यमाण आनंदमयः, तथा च सेवायां समर्पितस्य भगवदंगीकारानुभवेन तत्रतत्र स्वाधिकारानुरूपानुभावाद्यनुभवेन च सेवायामानंदविशेषाद्यनुभवात्तादृशसेवाप्रकटयितॄणामाचार्याणां तथात्वे विश्वासो मंदमध्यमयोरपि सुकर इति भावः ॥ ६ ॥

नन्वस्त्वानंदरूपत्वं तथाप्यानंद तरतमभावस्य श्रुतौ लोके च दर्शनाद्विवक्षितानंदरूपत्वं कथमित्याकांक्षायां तत्परिचायनाय धर्मान्तरं वदन्तीत्याशयेनाग्रिममवतारयंति **अतःपर**मित्यादि, आनंदरूपत्वनिर्धारणोत्तरं विलक्षणतापात्मकानंदजनकत्वरूपधर्मांतरेणापि पूर्वोक्ताग्निधर्मनिराकरणेनानंदसारभूताग्निरूपत्वमाहुरित्यर्थः, मूले संबोधनत्रयं कृपायोग्यतासंपादकस्वदीनताबोधनाय, तत्रापि प्रथममैश्वर्यख्यापकं "स्वामी त्वीश्वर" इतिकोशात्, तेन स्वस्य सर्वकरणसामर्थ्येन यदि कृपयसि तदैव विवक्षितस्वरूपं ज्ञातं भवति नतु प्रमाणबलेनेति ज्ञाप्यते, द्वितीयन्तु नामत्वेपि भगवद्भेदस्फोरकतया तादृक्सामर्थ्यनिर्वाहकं, तृतीयं स्वस्य स्वरूपज्ञातृत्वबोधक, टीकायां **तदंतरायेणेति** दर्शनांतरायेण, **तज्जनित** इति दर्शनांतरायजनितः, उचिततर-

मिति कार्ये हेतुसाम्यरूपात्कार्यादुचितं, कृपापूर्वकसंनिधानहेतुकं भगवद्दिदृक्षार्तितापरूपं कार्यमतिशयेनोचितमित्यर्थः, कथमस्योचिततरत्वमित्याकांक्षायामाहुः **यथेत्यादि**, **तथोक्त**मिति सहकारिलाभेनास्य शीघ्रमनुभवादतिशयेनोचिततरत्वमुक्तमित्यर्थः, यद्वा अग्नेस्तापस्य चालौकिकत्वाद्रसात्मकत्वाच्च भूताग्नितापापेक्षयैतस्यातिशयात्तथेत्यर्थः, पूर्वश्लोकेनुमानमत्र तु प्रत्यक्षं प्रमाणं विलक्षणाग्नित्व उक्तमितिविशेषः, अतःपरं लौकिकाग्निवैधर्म्येणालौकिकाग्नित्वं वदन्तीत्याशयेनाहुः **वक्ष्यमाणे**त्यादि, तानाहुः **पश्चादि**त्यारभ्यानुषज्यत इत्यंतं, तथा चासन्निधानसामयिकपूर्वतुल्यतापोदय एतन्मुखचंद्रदर्शनसामयिकतापोदयः कृपाहेतुकतत्प्राचुर्यं चेत्येते तद्विरुद्धा धर्मा इत्यर्थः, ननु सन्निधानसामयिकतापस्यात्यंतिकत्वे तदुत्तरमसन्निधानदशायामपि तदनुवृत्तिदर्शनान्नात्र चित्रत्वसिद्धिर्वैधर्म्याभावान्नात्यंतालौकिकत्वस्यापि सिद्धिरित्यत आहुः **यद्यपी**त्यादि, **इद**मिति विशेषणतयेतिशेषः **जलप्रकृतिकत्वा**दिति, अयमर्थः, "चन्द्रमा वा अपां पुष्प"मितिश्रुत्या रंहत्यधिकरणे अद्भिः संपरिष्वंगोक्त्या पृथिव्या जलजत्वेन च यथायथं चन्द्रमसो नायकादिमुखचन्द्रस्य च साक्षात् परंपरया च तथात्वेन तापापहत्वं दर्शनदशायामुचितं, आचार्यमुखेन्दोस्तापकत्वं चोचितं, परंतु दूरतो दर्शनेपि कृपामात्रेण तापोदयस्य चित्रत्वमिति, मूलयोजना तु यत्पश्चादपीत्थं तदेतच्चित्रं, यद् दृष्टेप्यस्मिन्मुखेन्दौ इत्थं तदेतच्चित्रं, यत्कृपात इत्थं तत् प्रचुरतरमुदेत्येव एतच्चित्रमिति, एतदेव ज्ञापयन्ति **एवकारे**णेत्यादिना ॥ ७ ॥

एवं पूर्वश्लोकसूचितप्रतिज्ञाचतुष्टये **नाविर्भूया**दितिद्वाभ्यां सोपपत्तिकमाज्ञाहेतुकः साधितः, ततः **प्रादुर्भूतेने**त्येकेनाज्ञादानबीजं साधितं, तत **उष्ण**-

त्वैकेतित्रिभिः प्रपदनकमभूतावतारस्वरूपमनुमानप्रत्यक्षाभ्यां निष्कृष्टं, तच्चैवं निष्कृष्यमाणं प्रत्यक्षेण सर्वात्मभावरूपतया पर्यवसन्नं, तस्य च "स्वे महिम्नि-प्रतिष्ठित" इतिश्रुत्या भगवदविनाभूतत्वादविभागलक्षणभेदे "सर्वेप्येवं यदु-श्रेष्ठे"तिभगवदुक्तरीतिकाखंडब्रह्मवादेन वास्तवाभेदे च सिद्धे साक्षात्कृष्णत्व-मेव सिद्धं, अनुभावप्रदर्शनं त्विच्छाधीनमिति तददर्शनेप्यनुगृहीतानां तथात्वज्ञानं सुघटमित्यादि हृदिकृत्य मूलरूपावताररूपे एकत्र बोधयन्तोभेद-प्रतिज्ञां पूरयन्तीत्याशयेनाहुः पूर्वश्लोकैरित्यादि, पूर्वश्लोकैरित्यस्य निरूप्येत्यनेन सम्बन्धः, मात्सर्यादय इति वस्तुतस्तु "ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिन" इति निबंधोक्तेः आदिपदेन कर्मासक्तिः संग्राह्येतिभावः, पूर्णज्ञानिभिरिति "पूर्णा भगवदीया ये शेषव्यासाग्नि-मारुता" इति श्रीमदाचार्यरूपतत्त्ववेत्तृभिः, कवीनां श्रोतुरधिका-रानुसारेण तत्त्वमनेकधा वदतां, तथा च भवत्सामर्थ्यबोधनार्थेयमुक्तिर्नतु स्वरूपतत्त्वनिष्कर्षबोधनपर्याप्तेत्यर्थः, तर्हि किं स्वरूपमित्यत आहुः वस्तुत इत्यादि, तथात्वेनेत्यादि भातेऽवतौ भवत्पदसिद्धेर्भगवत्त्वेन भानमेव प्रमाणमित्यर्थः, मंदादीनां तथानुभवाभावात्तदर्थं प्रमाणांतराणि वदंतीत्याशये-नाहुः पुनरित्यादि, व्याख्यानं तूत्तानार्थं, स्मृतिपादे प्रत्ययिततरानुभवस्य प्रामाण्यव्यवस्थापनात् स्मृतिहेतुभूतानुभवस्येवात्राव्याप्त्यानुभवस्य प्रामाण्यं पूर्वमुक्तं, अत्र च दिव्यरूपोनुभवः, तथा अग्निरूपत्वे अनंतदासानुभवोपि, चरणे संवाह्यमाने तस्याग्निस्पर्शेनेव हस्तकयोः फलकोद्गमात्, ततः परोक्ष-प्रमाजनको निगमः, "अन्योंतर आत्मानंदमयः" "आनंदो ब्रह्मे"त्यादि-रूपः सोप्यनुभवसंवादेनानंदमयत्वबुद्धिदार्ढ्याधायकः, ततस्तदुभयविशिष्टानि

मक्तांतःकरणानि धियः, "पदं ह्यनुध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्त्वमात्मन" इत्यादावुक्तानि तैरित्यर्थः, यद्वा निगमनं निगमः अनुभवं निगमयंत्येकतरपक्षपातिनं कुर्वतीत्यनुभवनिगमानि तादृशानि यान्युक्तमानानि पूर्वश्लोकसिद्धानुमानप्रत्यक्षाणि तैः, अथवा निगमो वेदः "श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टय"मित्यादिरूपः, "श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टय"मित्येकादशोक्तं भगवद्वाक्यं, आदिपदेन पुराणं, निगमादीनि तद्गुणसंविज्ञानो बहुव्रीहिः, अनुभवश्च निगमाद्युक्तमानानि च तैः, अयमर्थः "अत्रमां मार्गयंत्यद्धा युक्ता हेतुभिरीश्वरं गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानत" इति भगवद्वाक्याद्गुणलिंगकानुमानमत्रेश्वरत्वग्राहकं, तच्चानंदैकस्वरूपकृष्णसेवारसजनकस्वरूपो गुणो भगवदसाधारणः साधनसाध्ययोर्जलाग्निरूपत्वपरित्यागेन भगवत्त्वमेव गमयतीति पूर्वोक्तानुभवैतिह्यगुरुभक्त्युत्कर्षबोधकप्रत्यक्षश्रुतिश्च तत्र सहकरोतीति सर्वैस्तैर्गोकुलेशाभेदज्ञानं मंदमध्यमयोरपि युक्तयोरुपपन्नं, मंदादीनां तज्ज्ञानवत्तानिश्चयश्च तत्कृतभजनेन ज्ञायत इति सर्वमविवादमेवेतिदिक् ॥

एवं सार्धमष्टकं व्याख्यायोक्तार्थज्ञाने प्रभूणां श्रीमदाचार्याणां च कृपैव साधनमिति बोधयन्त उपसंहरन्ति पितृपादाब्जेत्यादि, एतेन येषामेवमर्थावबोधो नास्ति तेषु स्वापेक्षया कृपान्यूनतापि सूचितेतिशुभम्।८।

इति श्रीवल्लभाचार्यदासेन कृपया मया ।
तद्दर्शितेन मार्गेण विवृतिः संप्रकाशिता ॥ १ ॥

इति श्रीवल्लभाचार्यचरणदासानुदासेन श्रीपीताम्बरतनुजपुरुषोत्तमेन विरचितेयं श्रीवल्लभाष्टकविवृतिः सम्पूर्णा ॥

॥ श्रीकृष्णाय नमः ॥ श्रीगोपीजनवल्लभायनमः ॥

# ॥ श्रीरघुनाथविरचिता श्रीवल्लभाष्टकटीका ॥

यो रासरसिकानन्दसीधुसिंधुसुधाकरः ।
तं वन्दे वल्लभकुले प्रादुर्भूतं निजेच्छया ॥ १ ॥

**श्रीमदिति, य आज्ञया भूमौ प्रादुरासीत्तं हुताशं प्रपद्य** इति संबंधः, **श्रीमच्छोभायुक्तं, यद् वृंदावनं** तत्प्रकाशकत्वाद्यस्तदिन्दुस्तेन **प्रकटितस्त**स्माद्वा यो **रसिकानां** लीलारसिकपूर्णानामानंद**संदोहः** सुखसमूहस्तं **रूप**यतीति संदोहो **रूपं** यस्येति वा, तद्रूप एवेति वा, **स्फूर्जन्** बहुविधरससंवलनेन गर्जन्निव यो **रासादिलीलामृतसमुद्रः**, यथा प्राकृतसमुद्रो गंगादितूर्णतरंगिणीतस्तरलिततरंगो घूर्णितः सशब्दो भवति तथात्रापीतिभावः, तस्य **भरेणातिशयेनाक्रांता** व्याप्ताः **सर्वाः** देहादिवृत्तयो यस्य, तदा**क्रांताः सर्वे** भक्ता यस्य यस्माद्वा, लीलामृतसमुद्रैकमग्नोपि, किंच **यः शश्वदपि** सर्वदैवं-रूपोपि, यद्वा **शश्वदि**ति समस्तस्यैव विशेषणं, एवंविधोपि, **तस्यैव** वृंदावन-कलानाथस्यैव, किंलक्षणस्य ? **आत्मनो** रासक्रीडादिजनितो **योनुभावः** "विक्रीडितं व्रजवधूभिरिदं" मित्याद्युक्तस्तस्य **प्रकटनं** व्यक्तीकरणं तत्र **हृदयं** चित्तं यस्य, नहि रासादिलीलावर्णनं श्रीवल्लभाचार्यादन्यः कर्तुं शक्नोति, अत एव तैरुक्तं "अर्थं तस्य विवेचितुं नहि विभुर्वैश्वानराद्वाक्पतेरन्य" इति, सर्वप्रकारेण तत उन्मज्जनं न शक्यमपि, यो भक्तार्थमतिकारुण्ययुक्तः सन् भूत्वा तथापि **सन्मनुष्याकृतिर्भूत्वा** मनुष्येषु **सत्त्वं** तु सौब्राह्मण्यसत्कुलप्रसूतत्वादिना ज्ञेयं, अत्र यद्यप्यग्नित्वे **रससमुद्रसंबंधो** विरुद्धस्तथाप्यलौकिकत्वेन वडवानलवदविरोधः ॥ १ ॥

एवमप्रादुर्भावे महदनिष्टमित्याहुः नाविर्भूया इति, भवत आविर्भावः प्राकट्यं चेत् यदि न भवेत् तदा इमे मनुजाः कथमपि घोषाधीशं नैव प्राप्नुयुः सैषा दैवी सृष्टिर्व्यर्था स्यादित्यन्वयः, तदेव प्रपंचयन्ति अधिधरणितलमिति धरणितलमधिकृत्य आ ⋅ ⋅ ⋅, भूतनाथो रुद्रस्तेनोदितः तामसमनुष्यादिषूपदिष्टः तस्मादुदितो वा, योऽसन्मार्गः पाषंडमार्गो मोहकशास्त्रं, इदं सर्वं वाराहे पाषंडोत्पत्तिकथनावसरे "त्वं च रुद्र महाबाहो मोहशास्त्राणि कारये" त्यादौ स्पष्टं, तेन यद् ध्वान्तमज्ञानं वस्तुतत्त्वानिश्चयस्तेनैवांधतुल्या बहिर्दृष्टिसद्भावेप्यंतर्दृष्ट्यभावात् तत्तुल्यत्वं, तादृशाः संतो वेदमार्गे स्थिता अपि निगमपथगतौ वेदमार्गपरिज्ञानेंधतुल्या एवेति वा, एतेनोत्तमसाधनेपि न भगवत्प्राप्तिरिति सूचितं, किंच देवसर्गे सात्त्विकसृष्टावुत्पन्ना अपि, एतेनोत्तमाधिकारित्वेपि भगवदवतरणं विना न भगवत्प्राप्तिरितिसूचितं, किंच "द्वौ भूतसर्गौ लोकेस्मिन्" इत्यादिषु स्वप्राप्त्यधिकारिणी या दैवी सृष्टिः सापि व्यर्था स्यात् नहि भगवत्प्राप्तिमंतरेण दैवी सृष्टिः सफला भवति न च भवत्प्राकट्यमंतरेणापि तत्प्राप्तिरिति युक्तं वैयर्थ्यं, तदेव स्पष्टीक्रियते निजफलरहितेत्यनेन, निजं मुख्यं, देव द्योतमान बालक्रीडादिपरेति वा, वैश्वानर विश्वे सर्वेपि अनुकंप्या नरा यस्येति, अनेन कारुण्यं सूचितं, संज्ञाशब्दत्वान्नात्यन्तं व्युत्पत्त्याग्रहः ॥ २ ॥

पूर्वं निगमपथगतावप्यप्राप्तिरित्युक्तमिदानीं वस्तुतस्तत्पथगतिरप्यन्येषु नास्ति तत्त्वतस्तत्परिज्ञानाभावात् किंतु भवदधीनमेव तदित्याहुः नह्यन्येति, "वाचामधीशो वैश्वानरः" "अग्निर्मे वाच" इतिश्रुतेः वागधीशादन्यः श्रुतिसमूहरूपवचसां भावो तात्पर्यं आसमंताज् ज्ञातुं न हि ईष्टे नैव

समर्थो भवति, अत्र हेतुः **यस्मादिति**, यस्मात्कारणात्साध्वी पतिव्रता **वधूः स्वभावं हृदयं पत्युर्भर्तुरेवाग्रतः** पुरतः **प्रकटयति** नतु श्वश्र्वादिगुरुवर्गाणामपि,एवमत्रापि श्रुतिपतिव्रताधीशत्वस्य त्वय्येव सत्त्वादतोहेतोः हे **श्रीवल्लभाभिध त्वदुदितवचनात्** तव निरूपितश्रुतितात्पर्यात् **अन्यथैव ये रूपयंति** वर्णयंति, ते तु पूर्वं **भ्रान्ता** अज्ञानात्तत्वाग्राहिणः शुक्त्यादिष्विव रजतार्थिनः, तर्हि मत्प्राकट्येपि कथं न प्रमा तेष्वत आहुः **निसर्गेति**, **निसर्गतः** स्वभावत एव, **त्रिदशरिपुतया** आसुरतया, आसुराणामन्यथावगमा न दोषः, अन्यथा स्वभावपराहतिप्रसंगः,"प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा" इत्यादि वाक्यं च विरुध्येत, किंच नहि अज्ञानमात्रं तेषु अपि तु सर्वदा दुःखमपीत्याहुः **केवलं** सुखसंचाररहितं यथास्यात्तथा **नित्यदुःखा**[1] नित्यमनवरतं दुःखमेव येषां, फलदशायामपि ते तादृशाः ॥ ३ ॥

पूर्वमप्राकट्ये महदनिष्टमुक्त्वेदानीं प्राकट्ये महदिष्टमित्याहुः **प्रादुरिति, भूमौ प्रादुर्भूतेन** प्रकटितेन **त्वया व्रजपतेः सेवाख्यं यद्वर्त्म** भक्तिमार्गः तस्य **प्राकट्यं** प्रकाशनं **यत् कृतं तद् उतापि निजकृते** स्वभक्तार्थमेव नत्वन्यार्थमपीत्येव **श्रीहुताश** यज्ञभोक्तः अहं **मन्ये** निश्चिनोमि, अत्र निश्चायकं **यस्मादिति, अस्मिन्** त्वत्प्रकटितभक्तिमार्गे **स्थितः** सन् **यः** कश्चिदपि जनः **यत्किमपि** पत्रपुष्पादिकं **कथमपि** अतिशुद्धत्वापर्युषितत्वादिकं विनापि भूम्यन्तरिक्षासनाद्यनियमेपि **उपाहर्तुं** भगवन्निवेदनं **कर्तुमिच्छति** चेत् तत्सर्वं **गोपिकेशोऽद्धा** साक्षादेव न ब्राह्मणमुखादिद्वारा **स्ववदनकमले करोति** निक्षिपति, अत्र **वदन** इत्युपलक्षणं, तेन यद्यत्रोपभोगायोपपुज्यते तस्य तत्रोपभोगं करोत्येवेतिभावः, कीदृशे ? **चारुहासे** सुंदरहासयुक्ते ॥ ४ ॥

---

१ 'केवलान्धंतमोगा' इत्यत्र केवलं नित्यदुःखा इतिपाठः श्रीरघुनाथानाम् ।

विरुद्धधर्माश्रयत्वेनालौकिकत्वमेवाहुः उष्णत्वेकेति, उष्णत्वमेवैकः असाधारणः स्वभावो यस्य तादृशोपि त्वमत्र अस्मिंल्लोके अतिशिशिरा अत्यन्तशीतला ये वचःपुञ्जाः, भक्ततापनाशकत्वाच्छिशिरत्वं, तद्रूपमेवयत् पीयूषं तस्य वृष्टीर्वर्षा आर्तेषु संसृतितापतप्तेषु अत्यन्तमुग्रो निबिडो मोहो अज्ञानं येषु तादृशेष्वासुरमनुष्येषु तापं दाहमपि युगपदेककालमेव कुर्वन् वर्तसे यत् तत् स्वस्मिन् कृष्णास्यतामेव प्रकटयसि तद्धर्मसाम्याकारप्रकारात् कृष्णरूपत्वमपि नतु भूतदेवत्वं प्राकृताग्निरूपत्वं, कुत एतत् ? श्रीव्रजजननिचये भक्तसमूहे आनन्ददे सुखदायकं आसुराग्नेः पाखण्डमार्गरूपाग्नेः नाशकमपि, तत्रापि दावाग्निनाशकत्वं प्रसिद्धं " पीत्वा मुकुन्दमुखसारघ" मित्यादौ कृष्णास्यस्यानन्ददायकत्वं विरहाग्निनाशकत्वं च स्फुटं, प्रकृतेपि व्रजस्थितानां श्रुतिरूपत्वादासां च शब्दत्वेनास्यैकव्यापाराधीनत्वात् तद्रूपत्वेनापि तदानन्ददायकत्वमुचितम् ॥ ९ ॥

नन्वग्नेरलौकिकत्वमप्राकृतत्वं च श्रुतिविरुद्धमित्यत आहुः आम्नायोक्तमिति "अग्नेराप" इत्यादिवेदोक्तं, यदनलतः अग्नेः सकाशादम्भसो भवनमुत्पत्तिस्तच्च तत्तु सत्यं अङ्गीकृतं, विभो सर्वकरणसमर्थ, सर्गस्य सृष्टेरादौ प्रथमत एव यत् यस्माद् भूतरूपादेवानलात् पुष्करं जलमपि भूतरूपमेवाभवत् कारणाव्यभिचारित्वात्, तव तु तदपेक्षया महदेव वैलक्षण्यं, तदेवाहुः आनन्देकेति, आनन्द एवैकं स्वरूपं यस्य तादृशात् त्वद्-धिभु त्वत्सकाशाद्भवति जायत इति, क्लीबत्वाद्भवता, ईदृशं यत् किञ्चिदप्यभूत् जातं, किञ्च कृष्णसेवामृतसमुद्रश्च तदिदमखिलं कार्यजातमपि त्वज्जन्यत्वात्तव यादृशं स्वरूपं तादृशमेव भवितुमुचितं नत्वन्यथा, कुत

एतत् ? हि यस्मात् कार्ये हेतुसाम्यं कारणगुणकत्वमेवोचितं, नहि कटककुण्डलादीनि कनकगुणांस्त्यजन्ति, प्राकृताग्निजन्यत्वात्प्राकृतत्वमेवाम्भसां श्रुतौ प्रतिपादनमत्र तु तदभावान्न श्रुतिविरोध इतिभावः ॥ ६ ॥

स्वामिन्निति, हे श्रीवल्लभाख्याग्ने, भवतः कृपातः क्षणमपि भवत्सन्निधौ सामीप्ये सति प्राणादपि प्रेष्ठः प्रियतमः व्रजाधीश्वरस्तस्य वदनस्य या दिदृक्षा द्रष्टुमिच्छा दर्शनाप्राप्तौ सत्यां यस्तज्जनितार्तितापो जनेषु स्वकीयेषु प्रादुर्भावं उदयं आप्नोति इति यत्तदुचिततरं, तादृशचिन्तासन्तानस्य फलरूपत्वेन भगवदीयेषूचितत्वात्, किन्त्वन्यदप्याश्चर्यमित्याहुः यत्त्विति, यत् पुनरस्मिन्मुखेन्दौ यददर्शनादार्त्तिताप आसीत्तस्मिन्मुखचन्द्रे दृष्टेपि पश्चात्तदनन्तरमपि इत्थं पूर्ववदुदेत्युदयं प्राप्नोत्येव इति यत्तदेतच्चित्रमत्याश्चर्यं, अयं भावः, व्रजातिरिक्तस्थले भगवद्दर्शनावधि सर्वेषां तापो नत्वनन्तरमपि व्रजवासिनां तु निरुद्धानां प्रत्यहं दिवाऽदर्शनतापस्य सद्भावात्, भवदीयानां तु भवत्सान्निध्यमात्रेण तादृशावस्था भवतीत्येतच्चित्रमिति ॥ ७ ॥

वास्तवं रूपमाहुः, अत्र वास्तवं रूपं विहाय वह्नित्वं यद्वर्णितं तद्यत्किञ्चिद्धर्मसाम्येन नतु सर्वांशेन, तत्र किमंशेन साम्यमित्यपेक्षायां अज्ञानं तदादि यत्पापादि तद्रूपं यदन्धकारं तस्य प्रकर्षेण शमनमप्रादुर्भावपूर्विका निवृत्तिस्तत्र पटुता सामर्थ्यातिशयस्तत्ख्यापनायैव त्रिलोक्यां कविभिर्वह्निसालापचतुरैरपि, वस्तुतस्तत्त्वतो विचार्यमाणे सदा कृष्ण एव प्रादुर्भूतः प्रकटितो भवानित्येवंरूपं, अनुभवनिगमाद्युक्तमानैः, अनुभवपदेन प्रत्यक्षादीनि चत्वारि लौकिकप्रमाणान्युपलक्ष्यन्ते, निगमो वेदः, तदाद्या-

चारेतिहासादीनि एवंविधान्युक्तानि शास्त्रे कथितानि यानि प्रमाणानि तैः कृत्वा, इमे परिदृश्यमानाः निखिलाः सर्वे बुधजनास्तत्त्वदर्शिनस्त्वां श्रीश्रीवल्लभ श्रियोपिमण्डनरूप गोकुलेशमवेत्य ज्ञात्वा भजन्ते पूर्वमनधिकारित्वात्, यद्वा एवमवेत्य त्वां ये भजन्ते ते गोकुलेशमेव भजन्ते त्वद्भजनेनैव तद्भजनचारितार्थ्यमितिभावः ॥ ८ ॥

श्रीवल्लभाष्टकमिदं व्याकृतं यत्कृपादृशा ।
स एव क्षमतां देवो यदज्ञानादलेखि तव ॥ १ ॥

॥ इति श्रीवल्लभाष्टकटीका श्रीरघुनाथजीकृता सम्पूर्णा ॥

## ॥ श्रीगोकुलेशो जयति ॥

पुष्टिसृष्टिप्रवृत्त्यर्थं प्रादुर्भूतोऽखि यः प्रभुः ।
तत्स्वरूपाप्तये नित्यं वन्दे श्रीवल्लभात्मजम् ॥ १ ॥

श्रीमद्विट्ठलेश्वरचरणाः स्वीयेषु करुणया स्वाचार्यस्वरूपज्ञानार्थं तत्प्रकटितमार्गप्रापकतत्स्वरूपनिरूपकाष्टकं प्रकटयन्ति, तत्र श्लोकाष्टकेन निरूपणं धर्मिधर्मनिरूपणेनेति पूर्वं धर्मिस्वरूपं पद्यद्वयेनाहुर्द्विकुलरसरूपेण श्रीमदिति, यः भूमौ सन्मनुष्याकृतिः प्रादुरासीत्तं हुताशं प्रपद्य इति सम्बन्धः, तत्प्राकट्यस्य दुर्लभत्वेन विशेषयन्ति विशेषणेन, शश्वन्निरन्तरं, श्रीमानलौकिकभगवद्रमणैकशोभावान् यो वृन्दावनेन्दुः वृन्दा स्त्री नन्दनस्येन्दुः स्त्रीसुखात्मकस्तेन प्रकटितो यः रसिकस्य भगवतोर्थे आनन्दस्य सन्दोहः सारस्तद्रूपो यः स्फूर्जनतिशोभितो यो रासादिलीलात्मकोमृतजलधिस्तत्र भरो येषामलौकिकानां भावरूपजीवानां तैराक्रान्तं सर्वतः सेव्यमानं सर्वं स्वरूपं यस्य सः तादृशोपि यो भूमौ प्रादुरासीत्तं प्रपद्ये, अपिशब्देन स्वनिवेदितजीवभावरूपसेवाद्यनपेक्षित्वं ज्ञाप्यते यतस्तल्लीलास्थभक्ताक्रान्तत्वात्तैरेव तत्सम्भवात्, ननु एवं चेत्तदा प्राकट्यं किंप्रयोजनकमित्याकाङ्क्षायामाहुस्तस्यैवेति, तस्यैव भगवत इन्दोर्वा आत्मानुभावप्रकटनहृदयस्य आत्मनः श्रीमदाचार्याणामनुभावो निवेदनमन्त्रार्थाविर्भावकशक्तिरूपस्तत्रात्मप्रवेशेन रमणरूपस्तत्प्रकटनार्थं हृदयस्य, आज्ञया रसरूपया तयेत्यर्थः, ननु भगवति स्वानुभावप्राकट्यं चेत्तदा तत्र वृन्दावन एव कथं न प्रकटीकृतवान् ? भूमौ प्रादुर्भावे किं प्रयोजनमित्याशङ्क्याहु

रतिकरुण इति, करुणत्वेन जीवेषु स्वरूपरसदानेच्छया तथा कृतवान्, करुणत्वमेव प्रकटयन्ति हुताशमितिविशेषणेन, हुतं लौकिकस्वरूपमश्नाति भस्मीकरोतीतिभावः, कात्यायन्याधिदैविकमितिभावः, हुतमलौकिकस्वरूपं विप्रयोगाग्नौ तत्तापरूपत्वात् स्वयमेवाश्नाति भोगं करोतीतिभावः, एतेन गुणातीतस्त्रीभावात्मकस्त्रीभावकरेणुरूपमितिभावः, तमहं शरणं प्रपद्ये स्वस्य तच्छरणगमनोक्त्या पाठकर्तृणां शरणगमनं व्यज्यते, तेनैतादृशस्वरूपं ज्ञात्वा शरणीय इति ज्ञापितं, सन्मनुष्याकृतिरिति सात्त्विकभावापन्नः सदात्मकमनुष्यः पुरुषोत्तमस्तद्वदाकृतिर्यस्येत्यर्थः, यद्वा यः भूमौ सन्मनुष्याकृतिः प्रादुरासीत् पुरुषोत्तमस्तस्यैवात्मानुभावस्य रसात्मकस्य स्वाचार्यस्मरणात्मकस्य प्रकटनार्थं हृदयस्थ हुताशं तापात्मकं प्रपद्य इतिभावः ॥ १ ॥

एवं संयोगरसरूपदलेन पुंभावात्मकेन धर्मिरूपं निरूप्य द्वितीयरसात्मकदलरूपस्त्रीभावात्मकधर्मिरूपमाहुः नाविर्भूयादिति, हे देव क्रीडारूप, वैश्वानर तापात्मक, भवान् तापरूपेण चेत् नाविर्भूयात् अधिधरणितलं पृथ्वीमधिकृत्य तदा त्रिविधापि दैवी सृष्टिर्वृथा भूयात्, भूतनाथोदिता जीवनाथो भगवांस्तदुक्ता "दैवी सम्पद्विमोक्षाये"त्याद्युक्ता, देवसर्गेऽपि जाताः मनुजाः मर्यादादेवाः कथमपि अंशादिभेदेनापि घोषार्धांशं न प्राप्नुयुरित्यर्थः, पाप्मात्मेन स्वस्मिन्नन्यस्वरूपाज्ञानादंशादिषु पुरुषोत्तमभ्रमान् प्राप्नुयुः 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते' इतिवाक्येन विपरीतमेव स्यात्, निगमप्रमाणौ पुष्टिश्रुतिरूपन्निगमविज्ञाप्यानुक्तमार्गगतौ मार्गप्राप्तौ प्राप्त्यर्थं देवसर्गे कोऽप्यस्मै जाता अपि जीवाः पुष्टिमार्गीयाः सम्प्रार्थ्यानन्यानुभवाः अपे

येसन्मार्गास्तद्रूपो योन्धकारस्तेनान्वतुल्याः सन्ता घोशाधीशं न माप्नुयुः, ननु पुष्टिमार्गीयदैवसृष्ट्युत्पन्नानां कथमन्यमार्गमोहः स्यादितिचेत्, इत्थं, " स्वागतं व " इत्यारम्य " प्रतियात ततो गृहानि " त्यन्तं भगवदुक्तान्यमार्गमोहो भवेत् तत्तत्सामयिकरसौपयिकत्वस्थितिपक्षार्थकाज्ञानेन, तदा तासां भाग्येन तथा सम्बन्धोभूत् परमेवमन्येषां न भविष्यतीति न प्रवृत्तिर्भवेदितिभावः, तदर्थमेवाचार्यैं " भगवतोतिदुरापत्वेपि तदाशया तद्भजनमन्यभजनरहितं कुर्वद्भिरेव सर्वैः स्थेय"मितिभक्तिमार्गनिष्कर्ष इत्याद्यगादि, प्रभुचरणैरपि विद्वन्मण्डने "तदाशया तथा चेद्भजनं करोति तदा भगवानप्यङ्गीकरोती " त्यादि निरूपितं, एषा स्वकीया पुष्टिपुष्टिरूपा, निजफलरहिता निजफलमध्यात्मभावेन सेवाकरणं तद्रहिता स्यात्, चकारेण इयं सृष्टिर्यदा स्वफलरहिता स्यात्तदान्यसृष्टिः स्वफलरहिता स्याद् व्यर्थापि स्यादिति व्यज्यते तत्सृष्टिमध्ये एतत्सृष्टिसङ्कलनेनैव तत्सृष्टेः सार्थकत्वं, अन्यथा जीवसम्बन्धरहितदेहसृष्टिश्च व्यर्था स्यात्, अत्र वैश्वानरपदेनेदं व्यज्यते, यथा भगवतोक्तं " अहं वैश्वानरो भूत्वा "" पचाम्यन्नं चतुर्विधं" तथा तापात्मको भूत्वा सर्वेषु चतुर्विधपुरुषार्थान् रसरूपान् भोगरूपेण पक्वान् करोषीत्यर्थः, एतादृक्स्वरूपभोगकरणे द्वितोयदलस्यैव शक्तिरित्येतस्मिन्पद्ये द्वितीयदलात्मकधर्मिनिरूपणमितिभावः, अत एवास्मत्प्राणनाथैः निरूपितं " राधाधरसुधापातु"रित्यारम्य " नामसम्बन्धतो भवेदि"त्यन्तेन पद्येन ॥ २ ॥

एवं धर्मिरूपमुक्त्वा धर्मभावनिरूपणे पूर्वमैश्वर्यं निरूपयन्ति न यस्य इति, वागधीशाद्भगवन्मुखारविन्दादन्यः; श्रुतिगणवचसा व्रजसौभाग्यवती-

वाक्यानां भावं, आ समन्तादभिप्रायपूर्वकं **ज्ञातुं, न ईष्टे** न समर्थो भवतीत्यर्थः, कुतः ? **यस्मात् साध्वी** पतिव्रता **स्वपत्युरेवाग्रे स्वभावं प्रकटयति,** तत्रापि वधूर्नैवोढेत्यर्थः, तस्मात्कारणात् **श्रीवल्लभाख्य** श्रीशब्देन स्वामिन्युच्यते तद्वल्लभेत्याख्या नाम यस्य तेन वल्लभेतिनाम तदभिप्रायिकमेव, **त्वदुदितवचनात्** तादृशस्य तवोक्तवचनात्तासां भावमन्यथारूपयन्ति कथयन्ति ये **भ्रान्तास्ते निसर्गत्रिदशरिपुतया** साहजिकदेवद्वेषभावेनासुरभावेन **केवलान्धन्तमोगाः** अन्धन्तमसि गमिष्यन्तीत्यर्थः, **यद्वा त्रिदशरिपुतया** तिस्रो दशा यासां सात्त्विकादिभावेन तासां रिपुतया भगवद्भजनासहिष्ण्वासुरत्वेन **केवलं नित्यदुःखा** नित्यदुःखरूपा एव तिष्ठन्तीतिभावः, भगवन्मुखरूपत्वेनैश्वर्यता स्पष्टैव, भगवतोप्यैश्वर्यभावोयमेव यद् व्रजविलासिनोवचनोक्तन्यायेन सरणं श्रीमदाचार्याणामपि तद्वचनभावज्ञत्वनिरूपणेन रसरूपैश्वर्यभावो निरूपितः ॥ ३ ॥

एवमैश्वर्यस्वरूपं निरूप्य कीर्तिस्वरूप[1]माहुः **प्रादुर्भूतेनेति प्रादुर्भूतेन** भवता **व्रजपतिचरणाम्भोजसेवाख्यवर्त्म**प्राकट्यं भूमौ **यत् कृतं ते त्वया तत्** उत इति निश्चयेन **निजकृते श्रीहुताश** इत्यहं **मन्ये, कुतः ? यस्माद्स्मिन् मार्गे स्थितो** जीवः **यत्किमपि** नतूत्तममेव **कथमपि** भावात्मकस्वस्वरूपेण **भवद्दास्येन** वा **क्वापि** वृन्दावने भावात्मकस्वगृहे वा **उपाहर्तुं उप** समीपे **आहर्तुं** समर्पितुं आ समन्तात्स्वकृतार्थतार्थं प्रसादत्वेन ग्रहणार्थं **उप** समीप एव**-च्छति तत् अद्धा** साक्षात् **गोपिकेशः स्ववदनकमले चारुहासे** मनोहरहास्यसहिते स्वत्सम्बन्धात् **करोति भोजनमितिशेषः,** अयंभावः, भगवान् यद्धु-

---

[1] वीर्यधर्मात्मककीर्तिस्वरूपम् ।

ष्के तत्स्वामिनीमुखसम्बन्धयेव तस्मात्पूर्वं स्वभोजनात्स्वार्थमेवेत्यर्थः, अत एवा-स्मत्प्रभुचरणैः सम्पूर्णार्थैकपद्यद्वयेन निरूपितं "भाषण"मित्यारभ्य "नामसम्ब-न्धतो भवेदि"त्यनेन, व्रजपतिपदेन पुरुषोत्तमत्वं बोध्यते चरणानामम्भोजत्वो-क्त्या तत्सेवनात्मकमार्गोक्त्या पुष्टिरूपता मार्गस्योच्यते "न्यस्तं स्तनेषु विजहुः परिरम्य ताप" मित्युक्तप्रकारेणेत्यर्थः, प्रादुर्भूतत्वविशेषेणेन प्रादुर्भावस्य भगवदर्थकत्वेन मार्गस्य स्वार्थकता भिन्नरूपेण व्यज्यते वदनकमलोक्त्या, तच्च रविकरसम्बन्धादेवोत्फुल्लं सत् स्वरसप्रकाशकं भवति तथा तापात्मकभव-त्सम्बन्धिसामग्रीभोजन एव प्रभुः प्रसन्नो भूत्वा स्वरसदानं करोतीति व्य-ज्यते, अत एव चारुहासत्वं मुखविशेषणमुक्तं, भगवत्कीर्तिरियमेव यद्भक्तेषु कृपां करोति, इह च सर्वत्र भोजनार्थं मार्गप्राकट्येन तथात्वं, तेन कीर्ति-रूपता स्पष्टैव ॥ ४ ॥

एवं कीर्तिरूपत्वं निरूप्य तापरूपत्वेन निरूपणात्सर्वेषां तथात्वे भक्तैः कथं सेव्यः स्यादग्नित्वनिरूपणेन महादेवरूपत्वं भविष्यतीतिशङ्कां निराकुर्वन् यशःस्वरूपं निरूपयन्ति उष्णत्वैकस्वभाव इति, उष्णत्वमेव तापरूप-त्वमेव एकः स्वभावो विप्रयोगदुःखात्मकव्यभिचारभाव एतादृशोऽपि तत्स-मयेऽपि आर्तेषु भावात्मकदासीभावप्राप्ततत्समयिकदर्शनजदुःखभरेण भग-वन्मिलनप्रार्थकेषु अतिशिशिरवचःपुञ्जपीयूषवृष्टिः तदुक्तप्रकारेण भग-वन्मिलनार्थकगमनरूपशीतलतमवचनानां यः पुञ्जः समूह एव पीयूषं अमृतं तस्य या वृष्टिः सर्वाङ्गसेचनं तद्रूपा इत्यर्थः, तथैवात्यन्तसमग्रो मोहो येषां तत्सहितासुररूपाः ये नराः तेषु तापमपि कुर्वन् अत्रास्मिन्मार्गे युगपदेव भक्तेषु पीयूषवृष्टिरितरेषु तापं कुर्वन्, सर्वास्मिन् कृष्णास्यतां प्रकटयसि प्र-

कटीकरोषीत्यर्थः, चकारेण मुख्यं रूपं कन्दत्वात्मकमेव स्वं युगपदेतद्धर्मप्रा-कट्येन भगवन्मुखारविन्दरूपत्वमपि प्रकटीकरोषीति व्यज्यते, यद्वा, युगपदेव स्वरूपं भगवन्मुखरूपत्वं प्रकटीकरोषि तेन भावात्मकभक्तानां तादृक्तापदूरी-करणात्मकस्वस्वरूपं प्रकटयसि असुरेषु तापकत्वेन भगवन्मुखरूपत्वमिति-भावः, महादेवत्वप्राप्त्याशङ्कायामाहुः नो भूतदेवत्वं भूतदेवत्वोक्त्या तस्या-सुरपोषकत्वमुक्तं, एतत्तु तद्विपरीतमित्याहुः यस्मादेतत् श्रीव्रजजननिचये स्वामिनीसहितव्रजजनसमूहे आनंददं, व्रजजनानां स्वामिनीसहभावोक्त्या तत्सम्बन्धेनैव सर्वत्रानन्ददानं व्यज्यते, अत एव श्रीमदाचार्यचरणै "स्तद्द्वारा पुरुषे भवे"दिति निरूपितं, असुराग्रेश्च नाशकं भगवन्मुखस्यैवैतद्धर्मद्वयं यन्मुखारविन्देन व्रजजनानन्ददानं दावाग्न्यादिपानं च,न महादेवस्य,तेन तद्धर्म-प्राकट्येन कृष्णास्यतामेव प्रकटयसीत्यर्थः, भगवतश्चेदमेव यशो यद्भक्ते-ष्वानन्ददानेन पोषणं तदितराणां नाशकत्वं, इहापि तथात्वेन यशोरूपत्व-मितिभावः ॥ ५ ॥

एवं यशोरूपं निरूप्य श्रीरूपमाहुः आम्नायोक्तमिति, यदनन्ततः अभेरम्भोभवनं जलोत्पत्तिं आम्नायोक्तं तत् सत्यं यस्मात् सर्गादौ सृष्ट्या-रम्भे भूतरूपादनन्ततः महाभूतान्वितो भूतरूपमेव पुष्करं जलमभवत्, सा च साधारणसृष्टिः, चेदलौकिकं तथा न भवेत्तदा श्रुत्युक्तमन्यथा स्यात् तदर्थं विभो तत्सत्यकरणसमर्थ, आनन्दैकस्वरूपात् त्वत् त्वत्तः अपि भुवन-मधिकृत्य यत् कृष्णसेवारसाब्धिरभूत् तत् तस्माद्रसाब्धेःआनन्दैकस्वरूप-मखिलं जगदभूत् तत् कार्ये हेतुसाम्यं कारणसाम्यमुक्तं श्रीतिपुरुकलजनप-नाय, तापात्मकात् सेवारसाब्धिप्राकट्योक्त्या सेवात्मकमार्गप्राकट्यं यत-

तत्तापस्य यत्किञ्चित्स्वास्थ्यार्थं कृतमिति व्यज्यते, तदनन्तरमानन्दैकरूपता च प्रभोरानन्दमयत्वादेव तस्मादेतन्मार्गीयैः सेवा चैवमेव कर्त्तव्या, रसाब्धौ शयानस्य प्रभोः सेवनं श्रीरूपमेव, अत एव "लक्ष्मीसहस्रलीलाभिः सेव्यमान" मित्याचार्यैर्निरूपितं, अत्रापि सेवारसाब्धित्वनिरूपणेन श्रीरूपता स्पष्टैव ॥ ६ ॥

एवं श्रीरूपतां निरूप्य वैराग्यरूपमाहुः, **स्वामिन्निति**, स्वामिन् प्रभो **श्रीवल्लभाग्रे क्षणं भवतः सन्निधाने** नैकट्ये सति **प्राणप्रेष्ठव्रजाधीश्वरवदनदिदृक्षार्तितापः** प्राणादधिकत्वेन नायकभावेन व्रजाधीश्वरस्य वदनदर्शनेच्छाजनिता या आर्तिस्तज्जनितो यस्तापः आर्तिस्तापश्चेति वा, **जनेषु** जन्मादिक्लेशयुक्तेष्वपि यत् **प्रादुर्भावं आप्नोति इदमुचिततरं** भवतीत्यर्थः, यथाग्नेः सान्निध्ये ताप उचितस्तथा तापात्मकभवत्सान्निध्येपि भवतीति, उचिततरत्वकथनस्यायं भावः, श्रीश्चवल्लभश्च तौ तयोरुभयोस्तापात्मकाग्निरूपस्य सान्निध्येधिकः स भवेत् तत्र क्षणं सन्निधानं समर्पणार्थं तत्समये च तत्स्वरूपप्रभुस्वरूपस्मरणात्तापाधिकतेतिभावः, तथा सति **क्षणस्य** समय इत्यर्थः, समयं विचार्य सन्निधान इत्यर्थः, **व्रजाधीश्वर**नाम्नातिसुलभत्वज्ञाने सति **दिदृक्षा** व्यज्यते, तस्य पुनर्दुर्लभत्वेनार्तियुक्ततापाधिक्यं भवति यथाचोक्तमस्मत्सर्वस्वेन ' पशुपराजसुदुर्ललितः सुत" इत्याद्येन पद्येन, भवत्समर्पणसन्निधाने सति तथाभावेन तापोत्पत्तिरुचिततरा यत्तु कृपातः परमफलदानेच्छया भवतः **प्राणप्रेष्ठो** यो **व्रजाधीश्वरस्तद्वदनदिदृक्षार्तितापस्त्वत्सङ्गतर**सात्मकतादृग्वदनदर्शनेच्छारूपः **अस्मिन्मुखेन्दौ दृष्टे** सति, मुखस्येन्दुत्वेन विप्रयोगपाण्डुरत्वं, **तस्मिन् दृष्टे प्रचुरतरं** यथास्यात्तथोदेतीदं विचित्रं, **अस्य**

भावस्य दुर्लभत्वाच्चित्रतोक्ता, इन्दौ दृष्टे तापाधिक्यस्य च चित्रता भवत्येव, इत्थमिति विप्रयोगप्रकारेणेतिभावः ॥ ७ ॥

भगवतो भक्तातिरिक्तेषु वैराग्यं भक्तेष्वनुरागस्तथात्र समर्पितभक्तेषु तथादानेन तदतिरिक्तेषु वैराग्यता ज्ञायत इति वैराग्यरूपतां निरूप्य ज्ञानरूपतां निरूपयन्ति अज्ञानाद्यन्धकारेति, अज्ञानमादिर्यस्य स एवान्धकारः तत्प्रशमनं दूरीकरणं तत्र पटुता समर्थता तत्ख्यापनाय त्रिलोक्यां ते तव अग्नित्वं कविभिरपि शब्दार्थरसिकैः शास्त्रार्थज्ञैर्वा वर्णितं सदा नित्यमित्यर्थः, वस्तुतःअनुभवनिगमाद्युक्तमानैरनुभवात्मकनिगमरूपव्रजसीमन्तिन्याद्युक्तमानैः स्वानुभवात्मकनिगमाद्युक्तमानैश्च भवानग्निरूपस्तापात्मकः प्रादुर्भूत इति त्वामवेत्य कृष्ण एव तापात्मकं त्वां वर्णयन्ति, अतो निखिलबुधजनाः रसज्ञाः इमे इति समर्पितात्मानः, श्रीश्रीवल्लभ श्रीदृयस्यापि वल्लभ त्वां गोकुलेशं भजन्ते, यद्वा, यतः प्रादुर्भूतः कृष्णः सदानन्दोपि वस्तुतो भवांस्ताप इति त्वां वर्णयन्ति इति हेतोः निखिलबुधजनाः भगवत्स्वरूपविदः इमे त्वत्समर्पितात्मानः अनुभवात्मकनिगमरूपा व्रजनितम्बिन्यस्तदुक्तमानैः प्रमाणैस्तत्तापनिरूपक एव पुरुषोत्तमो नान्य इत्याद्यैस्त्वामेव प्रादुर्भूतगोकुलेशं पुरुषोत्तममवेत्य ज्ञात्वा भजन्ते, अत एव भगवता "गोपीनां मद्वियोगाधि" मित्यादि "किं करिष्यति किं वदिष्यती" त्यादिषु च तथैव गीयते, पुरुषोत्तमस्वरूपमेतादृगेवेति नाधिकं विचारणीयमत्र, अत एव श्रीशुकैरपि "नमोनमस्तेस्त्वि"त्यस्मिन्पद्ये भगवत्स्वरूपं तथैव निर्णीतं, ज्ञानस्वरूपमेतदेव यत्पुरुषोत्तमस्वरूपयाथात्म्यस्फूर्तिरेव, एतस्य ज्ञानस्वरूपत्वं स्पष्टमेवेतिदिक् ॥ ८ ॥

इति श्रीगोकुलाधीशवल्लभाष्टकमद्भुतम् ॥
प्रकाशितं तेन भूयात् प्रभुणो मत्प्रभुर्मयि ॥ १ ॥
यथोक्तमत्र तं ज्ञात्वा स्वरूपं मत्प्रभो सदा ।
भजन्तु भक्तास्तस्यैव कृपयाप्यत्ययं तथा ॥ २ ॥
एवंरूपस्वरूपस्य सेवनादेव सर्वदा ।
निश्चिन्ताः स्मो यतः कृष्णो वल्लभात्मजनन्दनः ॥ ३ ॥
कृपया श्रीघनश्यामो ववर्ष मयि सन्ततम् ।
स्वाचार्यचरणाम्भोजस्वरूपरसबिन्दुभिः ॥ ४ ॥

॥ इति श्रीमत्प्राणेशश्रीविट्ठलनाथचरणानुरक्तचरणरजोधनविरचितः
श्रीवल्लभाष्टकविवरणभक्तिरसजलधिः सम्पूर्णः ॥